पर्यावरणाध्ययनम्

आस-पास

तृतीयकक्ष्यायै पाठ्यपुस्तकम्

आस-पास

तृतीयकक्षायाः कृते
पर्यावरण-अध्ययनस्य पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

मार्चमासः 2013 इत्यस्मात् संस्करणात् अस्माभिः संस्कृतानुवादः कृतः।

ISBN – 81 -7450-473-7

सर्वाधिकारेण सुरक्षितम्

- प्रकाशकस्य पूर्वानुमतिं विना अस्य कस्यापि भागस्य मुद्रणं तथा च इलेक्ट्रोनिक-यान्त्रिक-प्रतिलिपि-रिकार्डिंग-माध्यमेन अथवा अन्यपुनः-प्रयोगविधिना संग्रहणं प्रसारणं च वर्जितम् अस्ति।
- अस्य पुस्तकस्य विक्रयणम् अनेन पणेन कृतम् अस्ति यत् प्रकाशकस्य पूर्वानुमतिं विना सावरणम् एतत् पुस्तकम् ऋणेन, पुनर्विक्रयणेन अथवा आभाटकेन न प्रदास्यते, न च विक्रेष्यते।
- अस्य प्रकाशनस्य यथार्थमूल्यम् अस्मिन् पृष्ठे मुद्रितम् अस्ति। निर्यास-मुद्रया अथवा संश्लिष्ट-पत्रखण्डेन अन्यविधिना च अङ्कितं मूल्यम् अयथार्थम् अस्ति।

एन. सी. ई. आर. टी. इत्यस्य प्रकाशनप्रभागस्य कार्यालयाः

एन.सी.आर.टी.ई.कैंपस
श्री-अरविन्दमार्गः
नवदेहली 110016 दूरभाषः 011 – 26562708

108, 100 फीटमार्गः
हेली-एक्सटेंशन-होस्डेकेरे
बनीशंकरी इस्टेज
बेंगलुरुः 560085 दूरभाषः 080 26725740

नवजीवनम्, ट्रस्टभवनम्
पत्रालयः नवजीवन
अहमदाबादः 380014 दूरभाषः 079 – 27541446

सी.डब्ल्यू.सी. कैंपससमीपम्
धनकलबसस्थानकम् पनिहटी
कोलकाता 700114 दूरभाषः 033 – 25530454

सी.डब्ल्यू.सी. कॉम्प्लैक्स मालीग्रामः
गुवाहाटी 781021 दूरभाषः 0361 - 2674869

प्रकाशनसहयोगः

अध्यक्षः प्रकाशनप्रभागः - अशोकश्रीवास्तवः

मुख्य-उत्पादन-अधिकारी - शिवकुमारः

मुख्यसंपादकः - नरेशयादवः

मुख्य-व्यापार-अधिकारी - गौतमगांगुली

उत्पादन-अधिकारी - अरुणचितकारा

आवरणम्, चित्राणि तथा सज्जता
अनीतावर्मा

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) बोधयति यत् छात्राणां विद्यालयजीवन-बाह्यजीवनयोः मध्ये सम्बन्धः प्रकल्पनीयः इति। सः सिद्धान्तः पुस्तकीय-ज्ञानराष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) बोधयति यत् छात्राणां विद्यालयीय-जीवनस्य बाह्यजगज्जीवनेन सह योजनं करणीयम् इति। अयं सिद्धान्तः पुस्तकीय-ज्ञानस्य तस्य न्यासस्य विपरीतम् अस्ति यस्य प्रभावद्वारा अस्माकं व्यवस्था एतावत्पर्यन्तं विद्यालय-गृहयोः मध्ये बहु-अन्तरं रक्षति। नूतन-पाठ्यचर्याधारितः पाठ्यक्रमः पाठ्यपुस्तकं च अस्य पारम्परिक-विचारस्य उपरि अवधानं करोति। एषः तु पारम्परिक-रटनशैलीं परित्यज्य प्रत्येकम् अपि विषयस्य दृढ-भित्ति-निवारणस्य प्रयत्नः अस्ति। आशा अस्ति यत् अयं प्रयत्नः बालकेन्द्रितशिक्षणं प्रति अस्मान् सुदूरं नेष्यति।

अस्य प्रयत्नस्य साफल्यम् अस्मिन् तथ्ये सन्निहितं वर्तते यद् विद्यालयानां प्राचार्याः शिक्षकाः च छात्रान् कल्पनाशीलगतिभिः शङ्काभिः च अधिगमने एवञ्च अधिगमनावधौ स्वानुभवान् विचारयितुम् अवसरान् यच्छन्ति। अस्माभिः एतद् अङ्गीकर्तव्यं यत् यदि छात्राणां कृते स्थानं समयः स्वतन्त्रता च दीयते तर्हि ते ज्येष्ठैः प्रदत्तयोः सूचना-सामग्र्योः साहाय्येन नूतनं ज्ञानम् आत्मसात् कुर्वन्ति। शिक्षणस्य आधारभूततत्त्वानां विविध-सामग्रीणां विचारान् अनवीक्ष्य यत् पुस्तकनिर्माणं भवति तत्तु परीक्षानिमित्तमात्रम् अस्ति। सर्जनात्मकतायाः उपक्रमस्य च विकासः तदा एव सफलो भवति यदा शिक्षकाः छात्रान् अधिगमप्रक्रियायाः मुख्यभागिनः इति अवगच्छेयुः तथा च तान् निर्धारित-ज्ञान-ग्राहकान् इति मा स्वीकुर्युः।

एतानि उद्देश्यानि विद्यालयस्य दैनिकजीवने कार्यशैल्यां च विपुलपरिवर्तनानि अपेक्षन्ते। दैनिकसमयसारिण्याः तावती नमनीयता स्यात् यावती शिक्षणस्य वार्षिक-दिनदर्शिकायाः व्यवहारे सजगता। येन शिक्षणस्य निर्धारित-दिनसङ्ख्या सत्यत्वम् आप्नोत्। शिक्षण-मूल्याङ्कन–विधयः एनम् एव अंशं निर्धारयन्ति यत् अनेन पाठ्यपुस्तकेन छात्राः मानसिक-खिन्नतां पठने च आलस्यं परित्यज्य सन्तोषकरम् अनुभवं प्राप्नुयुः। बालमनोविज्ञानं मनसि निधाय छात्राणां भारानुभवस्य निदानार्थम् उपलब्ध-समयस्य-उपरि अवधानं दत्त्वा पुस्तकमिदं निर्मितमस्ति। पाठ्यपुस्तकमिदं प्रयत्नमेनम् इतोऽपि अग्रे नेतुं छात्राणां चिन्तन-विचाराणां, विस्मयानां, लघुसमूहे वार्तालापानाम्, अथ च हस्तेन क्रियमाण-गतिविधीनां च प्राधान्यं प्रयच्छति।

एन्.सी.ई.आर्.टी. अस्य पुस्तकस्य निर्माणार्थं निर्मित-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटयति। पाठ्य-पुस्तक-परामर्श-समितेः अध्यक्षस्य प्रो.जयन्त-विष्णु-नारलीकर-महोदयस्य कृते एवं च अस्य पुस्तकस्य मार्गदर्शकस्य डा.हृदयकान्त-दीवान-महोदयस्य कृते विशेषतः वयं कृतज्ञताम् अर्पयामः। अस्य पाठ्य-पुस्तकस्य विकासे नैकानां शिक्षकाणां योगदानं वर्तते अपि च तस्य उद्देश्यस्य परिपूर्तये तेषां प्राचार्याणाम् अपि योगदानम् अस्ति। अतः तेभ्यः सर्वेभ्यः कृतज्ञता अत्र व्याह्रियते।

याः संस्थाः सङ्घाः च स्व-संसाधनद्वारा सामग्रीद्वारा सहयोगिनां द्वारा च औदार्येण साहाय्यं कृतवन्तः तेभ्यः सर्वेभ्यः वयं कृतज्ञतां व्यवहरामः । वयं विशेषतः माध्यमिक-उच्चतर-शिक्षाविभागस्य, मानव-संसाधन-विकास-मन्त्रालयद्वारा प्रो.मृणालमिरी अपि च प्रो.जी.पी.देशपाण्डेमहोदययोः आध्यक्षे नियुक्तायाः राष्ट्रिय- मानीटरिङ्ग-समितेः द्वारा प्रदत्तसमयस्य योगदानस्य च कृते कृतज्ञतां प्रकटयामः। व्यवस्थायाम् अपि च स्व-प्रकाशने निरन्तर-गुणात्मकतामानेतुम् एन्.सी.ई.आर्.टी. सर्वदा भवतां मार्गदर्शनं टिप्पणीः च स्वागतीकरोति येन अग्रिम-संशोधनेषु पुस्तक-निर्माणेषु च साहाय्यं भवेत् ।

नवदेहली

20 दिसम्बरः 2005

निदेशकः

राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद्

पाठ्यपुस्तक-निर्माण-समितिः

अध्यक्षा, प्राथमिक-पाठ्यपुस्तक-परामर्शदातृ-समितिः।

अनीता-रामपालः, प्राध्यापिका (सी.आई.ई.) दिल्ली-विश्वविद्यालयः दिल्ली

प्रमुखा परामर्शदात्री

सावित्रीसिंहः प्राध्यापिका, आचार्यनरेन्द्रदेवविद्यालयः नवदेहली एवं पूर्वफेलो-विज्ञानशिक्षा एवं सञ्चारकेन्द्रम्, दिल्लीविश्वविद्यालयः दिल्ली।

सदस्याः

बलजीतकौरः, प्राथमिक-अध्यापिका, एम. सी.डी. मॉडलविद्यालयः जमरूदपुरम्, देहली

दिलीपसिंहः, कार्यक्रमसमन्वयकः दिगंतरः शिक्षा एवं क्रीडासमितिः जयपुरम्

जूहीश्रीवास्तवः, कार्यक्रमसमन्वयिका निरन्तरः नवदेहली।

कविताशर्मा, व्याख्यात्री प्राथमिक-शिक्षाविभागः एन.सी.ई.आर.टी.

ममतापंड्या, कार्यक्रमसमन्वयिका पर्यावरणशिक्षाकेन्द्रम् अहमदाबादः

पूनममोंगिया, सहायक-अध्यापिका, सर्वोदयकन्याविद्यालयः विकासपुरी नवदेहली।

प्रीतिचड्डा, प्राथमिक-अध्यापिका, प्रायोगिकबेसिकविद्यालयः सी.आई.ई. देहली

रविन्दरपालः उच्चव्याख्याता, डी.आई.ई.टी, राजेन्द्रनगरः नवदेहली।

रीतूसिंहः व्याख्यात्री, डी.ई. एस. एस.एच., एन. सी.ई. आर. टी.।

सिमंतिनीधुरू, निर्देशिका अवेही-अबेकस-परियोजना, मुम्बई

स्मृतिशर्मा व्याख्यात्री, लेडीश्रीरामविद्यालयः, नवदेहली

सोनियाशामीहोकः, अध्यापिका, संस्कृतिविद्यालयः चाणक्यपुरी, नवदेहली

सुष्मितामलिकः भूतपूर्वपरामर्शदात्री, पी.एस.ई.बी. चंडीगढ़

संस्कृत-अनुवादकौ

श्रीविष्णुप्रसादः उपाध्यायः श्रीमाधवप्रसादजोशी च

संस्कृतसंवर्धनप्रतिष्ठानम्, दिल्ली

सहस्या एवं समन्वयिका

मजुः जैनः प्राध्यापिका प्रारम्भिक-शिक्षा-विभागः, एन.सी.ई.आर.टी. नवदेहली।

भारतस्य संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादिनं, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं निर्मातुं तथा च तस्य समस्तनागरिकाणां कृते;

सामाजिकम्, आर्थिकं तथा च राजनैतिकं न्यायम्,

विचारस्य, अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः च स्वतन्त्रताम्,

प्रतिष्ठायाः अवसरस्य च समतां प्रापयितुं तथा च

तेषु सर्वेषु

मानवीयगौरवस्य तथा च राष्ट्रियैकतायाः

अखण्डतायाश्च सुनिश्चयकत्रीं बन्धुतां संवर्धयितुं.....

दृढसंकल्पाः भूत्वा अस्यां स्वसंविधानसभायाम् अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।
2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम् ।

आभारः

अस्य पुस्तकस्य निर्माणे सहयोगार्थं राष्ट्रियशैक्षिक-अनुसंधानम् एवञ्च प्रशिक्षणपरिषद् अन्यविभिन्नसंस्थाः विषयविशेषज्ञान् शिक्षकान् एवं विभागीयसदस्यान् प्रति कृतज्ञतां ज्ञापयति।

पुस्तकविकासे सहयोगार्थं वयम् आचार्यकृष्णकान्तवरिष्ठं प्रति आभारं प्रकटयामः । विभागाध्यक्षः, प्रारम्भिकशिक्षाविभागः, एवम् एन.सी.ई.आर.टी. इति संस्थां प्रत्यपि विशेषरूपेण आभारं प्रकटयामः। या सर्वेषु कार्येषु सहयोगं कृतवती।

परिषद् पुस्तकविकासे सहयोगार्थं सर्वान् रचनाकारान् तथा च संस्थाः प्रति आभारं प्रकटयामः। या अस्य पुस्तकस्य रचनायाः प्रकाशनार्थम् अनुमतिं दत्तवती। एतस्य कृते विजेन्द्रपालः, (पत्ते) सिसौदिया, श्रीप्रसादः (पानी) सचिवः, भारतज्ञानविज्ञानसमितिद्वारा प्रकाशितं (मम भगिनी श्रोतुं न शक्नोति), हरीशनिगमः, (मेघाः आगताः) एकलव्यद्वारा प्रकाशितम्, हरेन्द्रनाथचट्टोपाध्यायः (रेलयानम्) तथा अन्नपूर्णासिन्हा एतान् सर्वान् प्रति आभारं प्रकटयामः।

परिषद् पर्यावरणशिक्षणकेन्द्रम्, अहमदाबादः, अवेही-अबेकसः, मुंबई, एकलव्यः भोपालः होमीभाभाविज्ञानशिक्षणकेन्द्रम्, (हल्कापुल्काविज्ञानम्) मुम्बई, दिगंतरः जयपुरः निरन्तरः नवदेहली, नेशनलबुकट्रस्ट, नवदेहली, राज्यशैक्षिक-अनुसंधान-प्रशिक्षणपरिषद् (एस.सी.ई.आर.टी.) देहली, विज्ञानशिक्षा एवं च संचारकेन्द्रम्, दिल्लीविश्वविद्यालयः, दिल्ल्यादिसंस्थाभ्यः तथा च तासां सदस्यानां सहयोगार्थम् आभारं व्यक्तीकरोति। यस्याः प्रकाशितपाठ्यपुस्तकसामग्र्याः परिषद् लाभं प्राप्तवती पुस्तकस्य विकासे सहयोगार्थं वयम् अंजनीकौलः, व्याख्यात्री, विज्ञानम् एवं गणितशिक्षाविभागः तथा एम.के सतपथी प्राचार्यः, उत्तरपूर्विक्षेत्रीयशिक्षा-संस्थानम्, मेघालयः। शिलांगः एन.सी.ई.आर.टी. इति संस्थां तथा च सदस्यान् प्रति आभारं प्रकटयामः।

उषाचौजरः प्रारम्भिक-शिक्षिका, एयरफोर्सबालभारतीविद्यालयः, नवदेहली, दीपाहरी, लेखकः एवं सम्पादकः, अवेही-अबेकस-प्रोजेक्ट, मुम्बई, अनीताजुल्का, प्रवाचिका विशेषः आवश्यकता-समूह-शिक्षा-विभागः, सुषमाजयरथः प्रवाचिका महिला-अध्ययन-विभागः, आर.बी.एल. सोनी,प्रवाचिका, प्रारम्भिक-शिक्षाविभाग-अन्यविभागानां सदस्यद्वारा पुस्तकस्य उपयोगः भवेत् एतदर्थं सर्वेषां महत्त्वपूर्णसेवायाः कृते परिषद् आभारं प्रकटयति॥

पुस्तकविकासस्य विभिन्नचरणेषु सहयोगार्थं कविता-चौधरी, डी.टी.पी. ऑपरेटरदुर्गादेवी, प्रूफरीडर, कल्पनावाजपेयी, कॉपीएडीटर, सुशीलाशर्मा, एवं निर्मलमेहता, सहायककार्यक्रम-समन्वयकः शाकम्बरदत्तः, प्रभारीकम्प्यूटरकक्षः प्रारम्भिकशिक्षाविभागः एतान् सर्वान् प्रति वयम् आभारं प्रकटयामः। प्रकाशनविभागेन अपि अस्माकं कृते पूर्णः सहयोगः कृतः। अतः तस्य कृतेऽपि वयम् आभार प्रकटयामः।

एस. अमालजेरी-अर्थपुथराजः दशवर्षीयः
सेन्टपैट्रिकमॉडर्न-उच्चमाध्यमिकविद्यालयः पुदुच्चेरी

© NCERT not to be republished

शब्दद्वयं शिक्षकेभ्यः अभिभावकेभ्यश्च

राष्ट्रियपाठ्यचर्यायाः रूपरेखायां (एन.सी.एफ) कथितोद्देश्यानाम् एकस्य राष्ट्रियस्तरस्य पर्यावरणाध्ययनपुस्तके प्रस्तुतिः लेखकमण्डलाय एकम् अत्यन्तं कठिनं कार्यम् आसीत्। लेखकमण्डलः पाठ्यपुस्तकविकाससम्बद्धान् स्वानुभवान् अभिप्रायान् च सर्वेभ्यः बण्टयितुम् एषिष्यति।

अस्य आयुर्वर्गस्य बालाः स्वपरिवेशं समग्ररूपेण पश्यन्ति । न तु विभागेषु , एतत् सम्बद्धान् काञ्चिदपि विषयान् विज्ञानरूपेण तथा समाजिकाध्ययनरूपेण च न पश्यन्ति । अतः एतत् आवश्यकं प्रतीतं यत् अस्मिन् पुस्तके बालानां परिवेशस्य प्राकृतिकाः सामाजिकाः च घटकाः समग्ररूपेण प्रस्तुयेरन् । पर्यावरणाध्ययनविषयस्य पाठ्यक्रमः अपि विभिन्नविषयाणाम् उपविषयाणां च नामावली-स्वीकरणापेक्षया तादृशान् उपविषयान् प्रस्तुवन् अस्ति , ये बालानां जीवनस्य अत्यन्तं समीपे सम्बद्धाः स्युः । प्राठ्यपुस्तके प्रयत्नः वर्तते यत् प्रत्येकम् उपविषयसम्बद्धाः प्राकृतिकाः समाजिकाः सांस्कृतिकाश्च पक्षाः अत्यन्तं सूक्ष्मरूपेण प्रकटिताः भवेयुः इति। येन बालाः स्व-विचारान् विचिन्त्य निर्मापयेयुः ।

राष्ट्रीयस्तरे कक्षायाः बहुसांस्कृतिकस्वरूपस्य प्रतिबिम्बीकरणम् एकम् अत्यन्तं कठिनं कार्यम् अवर्तत । एतत् आवश्यकं प्रतीतं यत् सर्वे महत्त्वं लभेरन् - तेषां समाजः संस्कृतिः वेषभूषादयः अपि महत्त्वपूर्णाः वर्तन्ते । पाठ्यपुस्तकस्य लेखनसमये मुख्यः प्रश्नः आसीत् यत् वयं कान् बालान् सम्बोधयन्तः स्मः ?- किं ते कस्यचित् विशालनगरस्य कस्यचित् प्रख्यातविद्यालयस्य वा छात्राः उत कस्यचित् कुटीरस्य घोषस्य वा विद्यालस्य अथवा कस्यचित् ग्रामीणविद्यालस्य आहोस्वित् दूरस्थस्य कस्यचित् पर्वतीयक्षेत्रस्य विद्यालयस्य ? एतावत्यः विविधताः पाठ्यपुस्तके कथं सम्मिलिताः क्रियेरन् ? लिङ्गवर्गधर्मभाषासंस्कृतिभौगोलिकस्थित्यादयः सर्वेऽपि विषयाः सम्मेलनीयाः आसन्। बालकाः व्यक्तिषु विद्यमानां विविधतां प्रति कथं संवेदनशीलाः क्रियेरन् ? एते केचन मुख्यविषयाः आसन्। ये पाठ्यपुस्तके सम्मिलितास्सन्ति। ये च अध्यापकैरपि स्वरीत्या सम्भालनीयास्सन्ति।

एतत्विषयसम्बद्धायाःचर्चायाःपूर्वम्अस्यविषयस्यपाठ्यक्रमंपठेत्।अस्यविषयस्यनूतनपाठ्यक्रमः षट्सुभागेषुविभक्तःअस्ति।-कुटुम्बःएवञ्चमित्रम्,भोजनम्,जलम्,आवासः,यात्रातथाचवयंवस्तूनिकथं निर्मामः।सम्पूर्णः पाठ्यक्रमः एन.सी. ई. आर. टी. इत्यस्य जालपुटे Www.ncert.nic.in अपि उपलभ्यते । पाठ्यक्रमं पठित्वा यदि इमं विषयं पाठयिष्यन्ति तर्हि भवन्तः एतत् सम्बद्धं ज्ञानं वर्धयितुं प्रभविष्यन्ति।

पुस्तके विषयवस्तु बालकेन्द्रितं वर्तते । येन बालाः स्वयम् अन्विष्य अवगमनस्य अवसरं प्राप्नुयुः । पाठ्यपुस्तके अयं प्रयत्नः वर्तते यत् रटनस्य प्रवृत्तिः न्यूना स्यात् । अतः परिभाषाणां वर्णनस्य अमूर्तप्रत्यादीनां नास्ति । पाठ्यपुस्तके सूचना दानम् अत्यन्तं सरलं कार्यं वर्तते । वास्तविकी समस्या वर्तते यत् अवसरः दीयेत येन ते स्वस्य विचारान् प्रकटेयुः।उत्सुकतांवर्द्धयेयुः।कृत्वाशिक्षयेयुः।तथाचप्रयोगंकुर्युः।बालाःपाठ्यपुस्तकेनसानन्दंसम्बद्धाः

भवेयुः । एतदर्थं पाठस्य प्रस्तुतीकरणं विविधप्रकारैः कृतं वर्तते । यथा -आभाणककथा संवादः कविता प्रहेलिका हास्यखण्डः नाटकः क्रियाकलापादयः । बालेषु काञ्चित् विषयान् प्रति सम्वेदनशीलतां विकसयितुं प्रायः आभाणककथानाम् उपयोगः महत्त्वपूर्णः मन्यते । यतः बालाः कथापात्रैः सह आत्मानं सहजतया सम्बद्धं प्रभवन्ति । पुस्तके प्रयुक्ता भाषा अपि औपचारिकी नास्ति अपि तु बालानां सामान्यव्यवहारिकी भाषा वर्तते ।

ज्ञानसर्जनाय बालेषु क्रियाशीलता अत्यन्तम् अपेक्षिता । पर्यावरणाध्ययनस्य अध्ययनं कक्षासीमायाः बहिर्जगता सह सम्बद्धं कृतं वर्तते । पाठ्यपुस्तके क्रियाकलापद्वारा अवलोकनक्षमतां वर्द्धयितुम् उद्याने सरोवरतटे प्राकृतिकभ्रमणादिषु नयनस्य अपेक्षा वर्तते। अनेन तेषु अवलोकनेन साकम् अन्यकौशलानामपि विकासः भविष्यति । पाठ्यपुस्तके प्रयत्नः वर्तते यत् बालानां स्थानीयं ज्ञानं विद्यालयीयज्ञानेन सह सम्बद्धं क्रियेत। अवधेयांशः एतत् वर्तते यत् पाठ्यपुस्तके सम्मिलितः क्रियाकलापः परामर्शमात्रं वर्तते । क्रियाः प्रश्नाश्च पाठस्य अन्ते अदत्त्वा ते पाठभागत्वेन एव दत्तास्सन्ति। अतः अध्यापकैः पुस्तके दत्तानां क्रियाकलापानां प्रयुक्तसामग्रीणां च स्थानीयपरिवेशानुगुणं रूपान्तरणं करणीयम् । पुस्तके विविधप्रकारकाः क्रियाकलापास्सन्ति ये बालेभ्यः अवलोकनस्य अन्वेषणस्य वर्गीकरणस्य प्रयोगस्य चित्रनिर्माणस्य वार्तालापकरणस्य भेदान्वेषणस्य लेखनादेश्च सर्वेषां कौशलानां शिक्षणावसरं परिकल्पयन्ति। पाठ्यपुस्तके एतादृशाः बहवः क्रियाकलापाः सन्ति यान् बालाः स्वयं स्वहस्तेन करिष्यन्ति तेन च तेषु क्रियाकौशलानां विकासः भविष्यति । बालेषु सर्जनायाः प्रकटनं रचनाकौशलः सौन्दर्यबोधश्चापि विकसितः भविष्यति । क्रियाकलापानन्तरं तस्मिन् विषये चर्चा बालानां स्वस्य अवलोकनस्य निष्कर्षनिष्कासने सहायकः भविष्यति । सार्धमेव उचितदिशि चर्चा परामर्शः वा बालेषु व्यक्तिगतरूपेण शिक्षणाय अत्यधिकः सहायकः भविष्यति । पुस्तके अस्मिन् विषये बहु अवकाशः अस्ति यत् बालाः ज्ञानाय शिक्षकान् पाठ्यपुस्तकान् चातिरिच्यान्यस्मात् स्रोतसः साहाय्यं स्वीकुर्युः । यथा - कुटुम्बसदस्येभ्यः , समुदायजनेभ्यः, समाचारपत्रेभ्यः पुस्तकादिभ्यश्च ।

पाठ्यपुस्तकमात्रं ज्ञानस्रोतः नास्तीति इति एतत् अस्मात् स्पष्टं भविष्यति । बहुकालात् प्राक्तन्याः। सूचनायाः इतिहासस्य वा निर्दर्शनमात्राय बालाः स्वज्येष्ठस्य साहाय्याय प्रोत्साहितास्सन्ति। अनेन बालानाम् अभिभावकस्य समाजस्य च विद्यालयेन संयोजनं तु भविष्यति एव सार्धमेव योगदानम् अपि वर्धिष्यते । शिक्षकैः अपि बालानां कुटुम्बविषये अवगमनस्य अवसरः प्राप्येत ।

'चित्रम्' अस्य आयुर्वर्गस्य बालानां पुस्तकस्य महत्त्वपूर्णम् अङ्गं भवति । चित्रस्य प्रकृत्या लिखितविषयः प्रतिबिम्बितः भवेत् इति लेखकदलेन अवहितं वर्तते। पुस्तके विषयवस्तु चित्रसाहाय्येन वर्द्धनम् एकम् आधाररूपेण वर्तते । चित्राणाम् उपयोगः एवं विधिना कृतं वर्तते यत् तानि लिखितकार्यस्य पूरकाणि भवेयुः । चित्राणि बालकेभ्यः हर्षं तु प्रदद्युः एव । सार्धम् एव ते ततः किमपि शिक्षयेयुः अपि । पाठ्यपुस्तके विविधप्रकारकेभ्यः क्रियाकलापेभ्यः विभेदाय केषाञ्चित् चिह्नानां प्रयोगः कृतः वर्तते । यस्य क्रमणिका पुस्तके सम्मिलिता वर्तते ।

पाठ्यपुस्तके बालानां कार्यकरणस्य विविधाः अवसराः कल्पिताः सन्ति । यथा - एकाकिना लघुसमूहे अथवा दीर्घसमूहे कार्यकरणम् । समूहे कृतेन पारस्परिकक्रियाकलापेन बालाः अन्योन्यस्मात् बहु किमपि शिक्षन्ते । अपि च अनेन मिलित्वा कार्यकरणस्य क्षमता वर्धते । बालाः शिल्पकलां चित्रकलां च समूहे

कृत्वा आनन्दिताः भवन्ति। यदा बालानां रचनात्मकतायाः प्रशंसा क्रियते तदा ते अतिप्रसन्नाः भवन्ति तान् प्रति प्रेरिताश्च भवन्ति। अतः तेषां प्रशंसा क्रियेत। तेषां रचनात्मकता अनावश्यकरूपेण न अनाद्रियेत।

पाठे प्रश्नानां क्रियाकलापानां च उद्देश्यं केवलं सूचनायाः विज्ञप्तेश्च परीक्षणमात्रं नास्ति अपि तु बालेभ्यः स्वविचारप्रकटनस्य अवसरप्रदानं वर्तते। एतान् प्रश्नान् क्रियाकलापान् च कर्तुं तेभ्यः पूर्णसमयः प्रदीयेत। यतः प्रत्येकम् अपि बालः स्वगत्या शिक्षते। अध्यापकः बालानाम् आवश्यकता पाठनस्य शैलीं स्थानीयस्थित्यनुगुणं स्वस्य मूल्याङ्कनविधीन् च स्वयं निर्धारयेत्। मूल्याङ्कने इतोऽपि अवबोध- वर्धनाय एन.सी.ई.आर.टी. इत्यनेन एकं स्रोतपुस्तकमपि सज्जीकृतं वर्तते। तत् अपि पठेत्। बालानां कौशलस्य मूल्याङ्कनं कक्षायां कक्षायाः बहिः वा तैः कृतानां क्रियाणाम् अनुरूपं भवेत्। मूल्याङ्कनम् एका सततप्रक्रिया अस्ति। अतः चर्चा सन्दर्भादिषु मूल्याङ्कनम् अत्यावश्यकम्। अत एव विविधक्रियाकलापाः प्रश्नाश्च पाठे एव अन्तर्भाविताः न तु अन्तिमे। तेषां यथा क्रमेण करणम् एव उचितम् भविष्यति।

समाजे लभ्यमानां विविधतां प्रति बालानां संवेदनशीलतां वर्धयितुं शक्येत इति पाठ्यपुस्तकस्य विकासे लेखकमण्डलस्य सम्मुखे एकः प्रमुखः विषयः आसीत्।

ताः विविधताः शारिरिकक्षमतासु ,आर्थिकस्थितिषु, अस्माकं व्यवहारे विभेदस्य कारणीभूताः वा भवेयुः - एतत् सर्वम् अस्माकं वासेषु परिधानशैलिषु भौतिकसुविधानाम् उपलब्धतादिषु च आश्रिताः भवन्ति। कस्याऽपि समाजस्य विविधता स्वाभाविकी अस्ति इति अस्माभिः प्रत्येकस्मिन् बाले अवबोधः उपपादनीयः भविष्यति। अस्माभिः एतेषां विविधतानां प्रशंसाकरणं सम्माननकरणं च शिक्ष्येत। अध्यापकैः अस्मिन् विषये अवध्यातव्यं भविष्यति यत् येन सामाजिकान् अभिप्रायान् (विषयान् (मुद्दों)) संवेदनशीलतया सम्भालयितुं शक्येत , विशेषरूपेण यदा कक्षायां विशेषावश्यकतासमुहवन्तः अथवा पीडितवातावरणात् आगम्यमानाः छात्राः भवेयुः।

लेखकमण्डलेन न केवलं बालानां विषये चिन्तितं वर्तते अपि तु अध्यापकाः अपि एतादृशव्यक्तिरूपेण दृष्टाः सन्ति ये ज्ञानं सर्जयन्ति। तथा च स्वानुभवान् वर्धयन्ति। अतः इदं पाठ्यपुस्तकं शिक्षणस्य सामग्रीरूपेण दृष्टं वर्तते। यदाश्रित्य शिक्षकः स्वस्य पठनपाठनस्य क्रियां सङ्गठितां कुर्यात्। येन बालकाः शिक्षणस्य अवसरं प्राप्नुयुः।

एन.सी.एफ.-2005 इत्यनुसारेण पर्यावरणाध्ययनम् एकं विषयरूपेण नास्ति। परन्तु एतत् सम्बद्धं कौशलं प्रयोजनं च गणितस्य एवं भाषायाः माध्यमेन सम्बद्धा चर्चा कृता वर्तते। एतदर्थम् एन.सी.ई.आर.टी. इत्येतत् द्वारा अध्यापकानां कृते एका ‘ Evs Skills through language and Mathematics in Easily Grades’ पुस्तिका प्रकाशिता वर्तते। यस्मिन् भाषा तथा गणितस्य एतादृशाः क्रियाकलापाः दत्ताः सन्ति, यस्मिन् भवन्तः पर्यावरणाध्ययनेन सम्बद्धान् विषयान् प्रथमकक्षायां द्वितीयकक्षायां च एकत्रीकर्तुं सहायतां प्राप्स्यन्ति। तृतीयकक्षायां शिक्षणाधिगमस्य आरम्भात् पूर्वं यदि भवान् पठिष्यति तर्हि भवतः विषये अवबोधः वर्धिष्यते।

पाठ्यपुस्तके प्रयुक्तानि चिह्नानि

चर्चां कुरु

वदतु

लिखतु

चिन्तयतु

करोतु/निर्मातु

ज्ञानं करोतु

अध्यापकेभ्यः / अभिभावकेभ्यः संकेतः



विषय-सूची



	आमुखम्	iii
	शब्दद्वयं शिक्षकेभ्य: अभिभावकेभ्यश्च	ix
1.	प्रतिशाखम्, प्रतितडागम्	1
2.	पादपानाम् अप्सरा:	10
3.	जलं रे जलम्	19
4.	अस्माकं प्रथम: विद्यालय:	25
5.	रमेशस्य गृहम्	30
6.	भोजनं स्वकीयम्-स्वकीयम्	36
7.	अनुक्त्वा वार्ता	43
8.	पक्षौ प्रसार्य उड्डीयन्ताम्	50
9.	मेघा: आगतवन्त:, वृष्टिम् आनीतवन्त:	57
10.	पचेम, खादेम	61
11.	इतस्तत्र	66
12.	कार्याणि स्वकीयानि स्वकीयानि	80







13. स्पृष्ट्वा पश्येत् 87

14. कुत: आगतवान्, क: पक्ववान् ? 92

15. आगच्छन्तु निर्मायाम पात्राणि। 96

16. क्रीडा क्रीडायाम् 101

17. पत्रम् आगतम् अस्ति 109

18. एतादृशानि अपि भवन्ति गृहाणि 116



19. अस्माकं मित्राणि जन्तवः 124

20. बिन्दु-बिन्दुना 132

21. विविधाः कुटुम्बाः 137

22. दक्षिण: वाम: 144

23. वस्त्रं सज्जितं कथम् 154

24. जीवनस्य जालम् 156

1 प्रतिशाखम्, प्रतितडागम्

मात: ! अद्य मां विद्यालयं प्रेषयतु । 'दिनद्वयं गृहे उपविश्य मनसि जामिता जाता'– इति पूर्णिमा अवदत् । माता उत्तरं दत्तवती – त्वम् इदानीम् अपि ज्वरपीडिता असि । अत: बहि: गत्वा खट्वायां विश्रान्तिं कुरु ।

खट्वायां विश्रान्तिं कुर्वती पूर्णिमा शयितवती । सहसा तस्या: मुखे उपरिष्टात् किमपि पतितम् । सा ससंभ्रमेण उत्थाय हस्तेन कपोलं स्पृष्टवती । धिक् ! एषा कस्य कुचेष्टा अस्ति - कपोतस्य अथवा काकस्य ? हूँ, काकस्य एव प्रतिभाति ।

बालका: स्वकीयपरिवेशस्य जनान्, वस्तूनि च दृष्ट्वा अवगम्य च बहुशिक्षन्ते । अयम् अध्याय: केवलं कक्षायाम् एव न पठनीय:, अपितु कक्षात: बहि: यानि वस्तूनि अनेन अध्यायेन सम्बद्धानि सन्ति तानि अवलोकनीयानि ।

पूर्णिमा वृक्षे अनेक-जन्तून् दृष्टवती । त्वया उपरि प्रदत्ते वृक्षस्य चित्रे के के जन्तव: दृश्यमाना: सन्ति ? तेषां नामानि लिख ।

_____ _____ _____ _____

_____ _____ _____ _____

पूर्णिमा पृथिवीत: एकं पत्रम् उत्थाप्य खगविष्ठाया: प्रोञ्छनं कृतवती । तथापि कपोले सान्द्रता आसीत् । अत: सा चिन्तितवती यत् पुरत: तडागे मुखं प्रक्षालयामि इति ।

पूर्णिमा तडागे कान् जन्तून् दृष्टवती ? चित्रं दृष्ट्वा तेषां नामानि लिखन्तु ।

_____ _____ _____

_____ _____ _____

पुस्तके 'जन्तु:' इति शब्द: सर्वविध-पशूनां, पक्षिणां, कीटानां स्तनधारिणां च कृते प्रयुक्त: अस्ति । अस्मिन् वयसि बालका: कीटादीनां, सर्पाणां, गृहगोधिकानां च अधिकसूक्ष्मतया वर्गीकरणं कर्तुं न शक्नुवन्ति । अत: इदं ज्ञातव्यं यत् बालका: 'जन्तु:' इति शब्देन किम् अवगच्छन्ति ?

तडागे ये जन्तव: सन्ति, तेषाम् अभिनयं कुर्वन्तु। क: जन्तु: कां क्रियां करोति ? जन्तूनां विभिन्न-ध्वनय: अपि मुखात् निष्कासयन्तु।

जन्तव: विभिन्न-प्रकारेण गतिं कुर्वन्ति । केचन चलन्ति, केचन विसर्पन्ति, केचन उड्डीयन्ते, केचन च तरन्ति। गत्यर्थं केचन पादानां साहाय्यं स्वीकुर्वन्ति, केचन पक्षिणां, केचन च पुच्छस्य अपि साहाय्यं स्वीकुर्वन्ति।

भवन्तः अपि बहून् जन्तून् दृष्टवन्तः स्यु:। तेषु के जन्तव: -

उड्डयन्ते _____ _____ _____

विसर्पन्ति _____ _____ _____

चलन्ति _____ _____ _____

उत्प्लवन्ति _____ _____ _____

पक्षयुक्ताः सन्ति _____ _____ _____

पादयुक्ताः सन्ति _____ _____ _____

पुच्छयुक्ताः सन्ति _____ _____ _____

जन्तव: विभिन्न-स्थानेषु निवसन्ति । केचन वृक्षे निवसन्ति, केचन जले, केचन भूमौ, केचन च भूमे: अध: निवसन्ति। केचन तु अस्माकं गृहेषु अपि निवसन्ति।

जन्तूनां वर्ण:, रूपम्, गति:, ध्वनि: इत्यादीनां दर्शनं तेषाम् अनुकरणं च बालकेभ्य: बहु: रोचते । जन्तूनां वैविध्यं दृष्ट्वा तेषां पृथक् पृथक् समूह-निर्माणेन एव वर्गीकरणस्य प्रारम्भ: भवति।

✳ अध: प्रदत्तानि चित्राणि पश्यन्तु। एतेषु ये जन्तव: गृहेषु न निवसन्ति, तान् रञ्जयन्तु।



✳ अत्र केषाञ्चित् जन्तूनां चित्राणि अपूर्णानि सन्ति। चित्राणि पूरयित्वा तेषां नामानि अध: लिखन्तु।

अहं क: अस्मि ?

वर्गप्रहेलिकायां मम नाम अन्विष्य तस्य उपरि गोलक- ○चिह्नं योजयन्तु। एकम् उदाहरणम् अत्र प्रदत्तम् अस्ति।

1. छदिसि उपविश्य कदलीफलं खादानि,
   इतस्तत: अहं कूर्दनं करवाणि।
2. भित्तिषु जालं रचयानि
   तस्मिन् कीटान् आकर्षाणि।
3. जागरणं कृत्वा रात्रिं यापयानि,
   दिनं भवेत् तु शयनं करवाणि।
4. टर्र-टर्र-टर्र इति रटनं करवाणि,
   उत्प्लुत्योत्प्लुत्य गच्छानि।
5. वृष्टे: अनन्तरं दृष्टौ आगच्छानि,
   पादविहीन: अपि विसर्पाणि।
6. मन्दं मन्दम् अग्रे गच्छानि,
   धावने तथापि विजयी भवानि।

द	क	छु	आ	ग
र	बं	में	ढ	क
च	द	स	म	प
क	र	ह	उ	न
म	क	ड़ी	ल्लू	च
कें	चु	आ	म	छ

षष्ठ-प्रहेलिकाया: आधार: 'शशक-कच्छपौ' इति पञ्चतन्त्रस्य कथा अस्ति। एतां कथां श्रावयित्वा पञ्चतन्त्रस्य अन्या: कथा: पठितुं बालकान् प्रेरयेयु:।



✳ अङ्गुलीनां चमत्कार:

चित्रं दृष्ट्वा वदन्तु - कानि चिह्नानि अङ्गुलीनां सन्ति कानि च अङ्गुष्ठस्य।

भवन्त: अपि एवमेव मशी द्वारा अथवा आर्द्रवर्णेन कागदे जन्तूनां चित्राणि निर्मान्तु। प्रदत्तानां चित्राणाम् अनुकरणं न करणीयम्, अपितु स्वमनसा निर्माणं करणीयम्। एतै: चित्रै: स्वकीयं विद्यालयं गृहं च अलङ्कुर्वन्तु।

बालकेभ्य: सृजनात्मक-गतिविधय: यथा - अङ्गुलीषु अङ्गुष्ठे च वर्णं लेपयित्वा चित्रनिर्माणम् इत्यादय: बहु रोचन्ते। अत: स्वेच्छया विविध-प्रारूपाणि निर्मातुं बालान् प्रेरयेयु:।

✳ एहि कानिचन चित्राणि रचयेम

- कस्यचित् एतादृशस्य जन्तो: चित्रं स्व-पञ्जिकायां निर्मान्तु, य: पूर्वं भवद्भि: दृष्ट: स्यात्।
- त्रय: बालका: मिलित्वा एकं चित्रं निर्मास्यन्ति।

एकस्य कर्गदस्य त्रिषु भागेषु आवर्तनं कुर्वन्तु।

1. एका बालिका कर्गदस्य प्रथमे भागे कस्यचित् जन्तो: मुखं निर्मातु। कर्गदस्य आवर्तनं कृत्वा चित्रं गोपयतु।
2. द्वितीया बालिका कर्गदस्य मध्यमे भागे कस्यचित् जन्तो: कबन्धं निर्मातु।
3. तृतीया बालिका कस्यचित् अन्यस्य जन्तो: पादान् निर्मातु।
4. इदानीम् एतं सम्पूर्णं कर्गदम् उद्घाट्य चित्रं पश्यन्तु।

सुन्दर: जन्तु: निर्मित: खलु !

स्वकीय-मित्राणां चित्राणि अपि पश्यन्तु।









बालकानां प्रोत्साहनं कुर्वन्तु यत् ते जन्तून् सावधानं दृष्ट्वा स्वमनसा चित्राणि निर्मान्तु। समूहे चित्रनिर्माणार्थं बालकेभ्य: साहाय्यस्य आवश्यकता भवितुम् अर्हति।

कस्यचित् वृक्षस्य अध: कञ्चित् कालम् उपविश्य सावधानं पश्यन्तु, वृक्षे तस्य पार्श्वे च के के जन्तव: सन्ति –

शाखासु	_____	_____	_____
पत्रेषु	_____	_____	_____
काण्डे	_____	_____	_____
भूमौ	_____	_____	_____
वृक्षस्य पार्श्वे	_____	_____	_____

अधुना एतान् जन्तून् क्रमेण लिखन्तु - लघोः विशालपर्यन्तम्।

1. _____	2. _____	3. _____
4. _____	5. _____	6. _____
7. _____	8. _____	9. _____
10. _____	11. _____	12. _____
13. _____	14. _____	15. _____

'जिग्सॉ' इति क्रीडा

'जिग्सॉ' इति क्रीडायां कस्यचित् चित्रस्य एतादृशा: खण्डा: भवन्ति यान् मेलयितुं तीव्रबुद्धे: आवश्यकता भवति।

वस्तूनि क्रमानुसारं संस्थापयितुम् एष: गतिविधि: प्रारम्भिकः सोपानः अस्ति। वस्तूनां क्रमेण संस्थापने बालकानां स्वानुभवः एव आधारः । यथा– मूषक: चटकाया: अपेक्षया लघु: अपि भवितुम् अर्हति दीर्घः अपि।

अधुना त्वम् अपि कस्यचित् जन्तो: चित्रेण एकस्या:'जिग्सॉ'इति क्रीडां निर्मापय । चित्रं संसृष्टपत्रे संश्लेषय । जन्तो: चित्रानुसारं संसृष्टपत्रं कर्तय । इदानीम् एतं संसृष्टपत्रं ऋजु–तिर्यक्-खण्डेषु कर्तय । खण्डान् पृथक् कृत्वा तान् संयोजयितुं स्वमित्राणि कथय । तथा च जन्तो: नाम अपि पृच्छ ।

'जिग्सॉ' इति क्रीडाया: निर्माणम् एवं करणीयं यत् तस्यां क्रीडायां का अपि प्रतिस्पर्धा भवेत् –एतादृशा: खण्डा: न स्यु:, येषां योजनं बहुसरलं भवेत् ।

प्रथमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		**संस्कृतशब्दाः**
डाल-डाल पर, ताल-ताल पर	-	प्रतिशाखम्, प्रतितडागम्
बोर होना	-	जामिता
खटिया	-	खट्वा
आड़े-तिरछे	-	ऋजु-तिर्यक्
चूहा	-	मूषकः
हड़बड़ाना	-	ससम्भ्रमः

2 पादपानाम् अप्सराः

रविवासरे वयं सर्वे बालकाः समीपम् उद्यानं गतवन्तः । तत्र सर्वे गोपनक्रीडाम् अन्त्याक्षरीक्रीडां च क्रीडितवन्तः । बहुः आनन्दः अनुभूतः । अनन्तरं भगिनी उक्तवती – आगच्छन्तु, अहं भवतः एकां नूतनां क्रीडां बोधयामि । वयं गतशिविरे एतां क्रीडां क्रीडितवन्तः । अहं भवामि 'पादपानाम् अप्सराः' । 'पादपानाम् अप्सराः' यस्य वस्तुनः नाम वदिष्यति, भवन्तः तस्य वस्तुनः स्पर्शं करिष्यन्ति ।

भगिनी क्रीडां प्रारब्धवती । सा उक्तवती – 'पादपानाम् अप्सराः' कथयति, कम् अपि पादपं स्पृशन्तु । एतत् श्रुत्वा एव सर्वे बालकाः पादपान् स्पर्ष्टुम् धावितवन्तः ।

बालकैः एतस्मिन् विषये चर्चा कर्तुं शक्यते यत् तेषां क्षेत्रेषु गोपनक्रीडा, अन्त्याक्षरीक्रीडा इत्यादीनां क्रीडानां काः संज्ञाः भवन्ति ।

भगिनी उक्तवती – शोभनम् ! सर्वे एकैकं पादपं स्पृष्टवन्तः । किञ्चित् पश्यन्तु, सर्वेषां पादपाः कियन्तः पृथक् पृथक् सन्ति ।

कमला उक्तवती – भगिनि ! भवती अपि तु लघूनां पादपानाम् उपरि उपविष्टा अस्ति । विचारयन्तु भगिनी केषु पादपेषु उपविष्टा स्यात् ? क्रीडा पुनः प्रारब्धा । इदानीं 'पादपानाम् अप्सराः' अवदन् – एकम् एतादृशं वृक्षं स्पृशन्तु यस्य करण्डः बहु स्थूलः भवेत् अथवा बहु कृशः ।

बालकाः पुनः स्थूलान् कृशान् च वृक्षान् स्प्रष्टुं धावितवन्तः ।

किं भवन्तः एतादृशं वृक्षं दृष्टवन्तः यस्य करण्डः चित्रे दर्शितवृक्षवत् स्थूलः भवेत् ?

मोहनाय एषा क्रीडा बहु रोचते । क्रीडायाम् अप्सराः भूत्वा सः सर्वेषु बालकेषु स्वादेशं चालयितुं शक्नोति स्म । सः उक्तवान् – अधुना अहं भविष्यामि 'पादपानाम् अप्सराः' । अहम् 'अप्सराः' ! अस्तु, अहं भविष्यामि । सर्वे हसन्तः अप्सरसः आदेशस्य च प्रतीक्षाम् कृतवन्तः ।

मोहनः उक्तवान् – सर्वे बालकाः शीघ्रतया मह्यं कानिचन पत्राणि स्वीकृत्य ददतु ।

भगिनी उक्तवती - परन्तु अवधेयं पत्राणां त्रोटनं न करणीयम् ।

सर्वे धावितवन्तः। तथा च यानि पत्राणि अधः पतितानि आसन् तानि आनीतवन्तः ।

बालकाः एतां क्रीडां स्वयं क्रीडित्वा वृक्षेषु पादपेषु स्थितां विविधतां दृष्ट्वा अनुभविष्यन्ति । पृथक् पृथक् बालकाः यदि 'पादपानाम् अप्सराः' भविष्यन्ति तु एषः समीचीनः भविष्यति यतो हि ते स्वयं वर्गीकरणस्य आधारस्य चयनं करिष्यन्ति ।

किं सर्वेषां पत्राणां वर्णः, आकारः उपान्ताः च समानाः सन्ति ?

दयारामः उक्तवान् - अहं तु न जानामि स्म, यत् पत्राणि एतावन्ति प्रकारकाणि अपि भवन्ति इति। पश्यन्तु किञ्चन वर्तुलम् अस्ति, किञ्चन लम्बमानम् अस्ति तथा किञ्चन त्रिकोणकम् अस्ति।

अम्मू उक्तवती - एतेषां वर्णाः अपि कियन्तः भिन्नाः भिन्नाः सन्ति - किञ्चन लघु हरितं तु किञ्चन गाढं हरितम्। किञ्चन पीतम्, रक्तम्, नीललोहितं च अस्ति। एकं पत्रम् अस्ति तु हरितं परन्तु तस्मिन् श्वेतानि चिह्नानि सन्ति।

शबनमबाला उक्तवती – पश्यन्तु, पत्राणाम् उपान्ताः अपि कियन्तः पृथक्पृथक् सन्ति। कस्यचित् पत्रस्य उपान्तः ऋजुः अस्ति, चेत् कस्यचित् जीर्णः शीर्णः च अस्ति। केषाञ्चित् पत्राणाम् उपान्ताः तु आरासदृशाः सन्ति।

अधुना अहं भविष्यामि 'पादपानाम् अप्सराः' – अनीता कमला च मिलित्वा उक्तवत्यौ।

भगिनी उक्तवती – आगामी रविवासरे भवतु। इदानीं गृहगमनस्य समयः अभवत्। मार्गे भगिनी सर्वान् बालकान् एकां कविताम् अश्रावयत्–

अध्यापकानां / अभिभावकानां कृते सङ्केतचिह्नम् – बालाः विविधप्रकाराणां पतितानि पत्राणि एकत्रीकुर्युः, तेषां पादपानां नामानि अवगच्छेयुः च।

पत्राणि

हरितानि हरितानि, आर्द्राणि शिथिलानि च,
रक्तानि, नीललोहितानि, कानिचन पीतानि च।
भिन्नानि भिन्नानि भवन्ति पत्राणि,
विभिन्नानि विभिन्नानि भवन्ति पत्राणि,
कानिचन गजस्य कर्णसदृशानि,
पक्षचालनं कुर्वन्ति पिशाच: इव
जीर्णानि शीर्णानि कानिचन परिवर्तितानि,
खादन्ति कानिचन यथा ताम्बूलम्।
प्रात: काले, सान्द्रे अन्धकारे,
तुषारस्य अश्रूणि रुदन्ति पत्राणि।
प्रतिभाति किमपि चित्रपतङ्ग: इव,
रोमयुक्तं किमपि सर्वथा रोमरहितम्
भवति किमपि शुष्कयित्वा कण्टकम्,
किमपि सङ्कुच्य भवति कटोरम्।
साँय – साँय, सन् – सन्, फड़ – फड़ इति,
वायु: चलति तु कुर्वन्ति बड़ – बड़ इति।
आदिनं भवन्ति विकसितानि विकसितानि
इव सूर्येण सह शयनं कुर्वन्ति पत्राणि।
भिन्नानि भिन्नानि भवन्ति पत्राणि
विभिन्नानि भिन्नानि भवन्ति पत्राणि

विजेन्द्रपाल: सिसोदिया

बालकानां कविताया: गानं रुचिकरं प्रतिभाति। ते बलात् स्मरणं कर्तुं न कथनीया:। उचितं भविष्यति यत् सर्वे बालका: कक्ष्यायां मिलित्वा गायेयु:।

* कवितां परित: निर्मितेषु पत्रेषु वर्णं पूरयन्तु –

कानिचन पत्राणि एकत्रीकुर्वन्तु यथा - जम्बीरम्, आम्रम्, निम्ब:, तुलसी, पुदीन:, हरितधनिका। एतेषां पत्राणां सम्पीडनं कुर्वन्तु तेषां सुगन्धं जिघ्रन्तु च। किं सर्वेषां पत्राणां सुगन्ध: समान: अस्ति ?

* किं भवन्त: केवलं सुगन्धेन एतेषां पत्राणाम् अभिज्ञानं कर्तुं शक्नुवन्ति ?

पश्यन्तु कियन्ति सुन्दराणि चित्राणि निर्मितानि सन्ति। आम्, एतानि शुष्कै: पत्रै: एव निर्मितानि सन्ति।

भवन्त: अपि अधुना शुष्कै: पत्रै: पृथक् पृथक् जन्तूनां चित्राणां स्वटिप्पणी-पुस्तिकायां निर्माणं कुर्वन्तु।

प्रसिद्ध: कलाकार: विष्णु: चिञ्चालकर: (इंदोर:, मध्यप्रदेश:) एतादृशै: शुष्कै: पत्रै: शोभनस्य चित्रस्य निर्माणं करोति स्म। एषा कलाकृति: अपि तस्मात् एव प्रेरिता अस्ति।

* भगिनी सर्वेषां पत्राणां करण्डानां च चिह्नस्य ग्रहणम् अपि बोधितवती। पश्यन्तु कथम् ?

(1) एकं कर्गदं, अपि च सिक्थनवर्णः अङ्कनीं वा स्वीकुर्वन्तु। (2) पत्रम् उत्पीठिकायाम् अथवा भूमौ स्थापयन्तु। अवधेयं यस्मिन् भागे पत्रस्य सिराः स्फीताः भवेयुः तं भागम् उपरि करणीयम्।

(3) कर्गदं पत्रे स्थापयन्तु।

(4) अधुना लघुहस्तेन कर्गदे सिक्थनवर्णं अङ्कनीं वा चालयन्तु।

(5) पत्रस्य कर्गदस्य च कम्पनं न करणीयम्।

* अधुना एवमेव कस्यचित् करण्डस्य चिह्नम् अपि स्वीकुर्वन्तु।

एतस्य कृते एकं कर्गदं गृहीत्वा करण्डे स्थापयन्तु तथा तस्मिन् वर्णं पूरयन्तु। पश्यन्तु, भवतां कर्गदे करण्डस्य चिह्नं निर्मितम्। अधुना परस्परं निर्मितानि चिह्नानि पश्यन्तु। किम् सर्वेषां वृक्षानां चिह्नानि समानानि सन्ति ? कस्य पत्रस्य चिह्नं समीचीनं निर्मितम्। कस्य वृक्षस्य चिह्न- स्वीकरणं कठिनम् आसीत् ? किमर्थम् ?

चित्रे केषु-केषु वस्तुषु पुष्प–पत्राणाम् अभिकल्प: निर्मित: अस्ति ?

वृक्षाणां पादपानां च विषये ज्ञातुं बालका: स्व-ज्येष्ठान् अथवा कम् अपि कृषकं कम् अपि उद्यानपालकं वा पृच्छेत् ।

* स्वगृहं पश्यतु केषु वस्तुषु पुष्पाणां पत्राणां च अभिकल्पा: निर्मिता: सन्ति ?

_____ _____ _____ _____

* भवन्त: बहून् वृक्षान् पादपान् च दृष्टवन्त: । तेषु भवन्त: कतीनां नामानि जानन्ति ? तेषां नामानि लिखन्तु ।

_____ _____ _____ _____

_____ _____ _____ _____

* एतादृशानां वृक्षानां पादपानां च नामानि लिखन्तु यान् भवन्त: कदापि न दृष्टवन्तः, किन्तु तेषां नामानि श्रुतवन्तः ।

_____ _____ _____ _____

_____ _____ _____ _____

* कस्माच्चित् वृद्धात् अवगच्छत । किं केचन एतादृशा: वृक्षपादपा: सन्ति, ये तस्मिन् समये भवन्ति स्म यदा ते लघुबाला: आसन् , किन्तु अधुना ते न दृश्यन्ते ?
* किं केचन एतादृशा: वृक्षपादपा: सन्ति, ये पूर्वं न आसन्, परन्तु इदानीं दृश्यन्ते ।

वृक्षेण सह मित्रता

भवत: विद्यालयस्य अथवा गृहस्य पार्श्वे कञ्चिद् अपि वृक्षं अन्विष्यतु तथा तेन सह मित्रतां सम्पादयतु ।

एका दीर्घकालिकी मित्रता

* एष: किंजातीयः वृक्ष: अस्ति ? न जानन्ति चेत् ज्येष्ठान् पृच्छन्तु ।
* किं भवान् मित्रवृक्षाय किमपि विशिष्टं नाम दातुम् इच्छेत् ? किं स्थापयिष्यति तस्य नाम ?

बालकान् केनापि एकेन वृक्षेण सम्बद्धुं प्रेरयन्तु – तस्मै जलदानम्, तस्य संरक्षणं करणम्, तस्य सूक्ष्मतया दर्शनम् इत्यादयः । एतेन पर्यावरणं प्रति तस्य आसक्ति: अपि वर्धिता भविष्यति ।

* किम् एष: वृक्ष: पुष्पाणि अथवा फलानि ददाति ? वदन्तु कानि ?
* एतस्य वृक्षस्य पत्राणि कीदृशानि सन्ति ?
* किम् एतस्मिन् वृक्षे पक्षिण: अथवा अन्ये जन्तव: निवसन्ति ? के के ?

स्वकीयस्य एतस्य वृक्षमित्रस्य विषये इतोऽपि बहून् अंशान् जानन्तु सर्वान् वदन्तु च।

द्वितीयपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः	-	**संस्कृतशब्दाः**
तना	-	करण्डः
किनारें	-	उपान्ताः
छुपनछुपाई	-	गोपनक्रीडा
नीम	-	निम्बः
नींबू	-	जम्बीरम्

3 जलं रे जलम्



जलम्

मुखं प्रक्षालयिष्यामि जलेन,
मोहन: कथयति मातामहीम् ।
पिपासिता: जलं पिबन्ति,
जलेन सर्वे जीवन्ति ।
न जानामि कदारभ्य जलम् अस्ति,
कियती महती कथा अस्ति ।
कुत्रचित् तुषार: अस्ति, कुत्रचित् हिमम्,
जलम् एव किं वाष्प: नास्ति ?
सर्वेषु रूपेषु जलम् अस्ति,
कथयति एवं मातामही ।
नद्य: वहन्ति 'कलकलकल' इति
निर्झरा: गायन्ति 'छलछलछल' इति
तालेषु दोलनं करोति जलम्,
कूपेषु आयाति निर्मलम् ।
भूमौ जीवनम् आनीतम्,
क्षेत्रं सिञ्चित्वा दोलितम् ।
परन्तु यदा आप्लावम् आनयति,
महतीम् आपत्तिं जनयति ।

-श्रीप्रसाद:

स्वक्षेत्रे गीयमानां श्रूयमाणां वा जलेन सम्बद्धां कवितां गीतानि च बालका: कक्ष्यायां गायेयु: । एतेन स्वसमुदायस्य ज्ञानं तथा कलां प्रति तेषां रुचि: वर्धिता भविष्यति ।

* किं भवान् जले कामपि कविताम् अथवा गीतं गातुं जानाति ? कक्ष्यायां श्रावयतु।
* कवितायां जलसम्बद्धानां केषां ध्वनीनां उल्लेखः कृतः अस्ति ? काञ्चन ध्वनीन् भवान् अपि वदतु।
* कविः किम् उक्तवान् - जलं कुत्र कुत्र अस्ति ?

* अधः दत्तेषु येषु कार्येषु जलस्य आवश्यकता भवति, तेषु '✓' इत्यस्य चिह्नं योजयतु।

क्रीडायाम् ☐ गीतस्य गायने ☐ चायस्य निर्माणे ☐

पिष्टस्य आपीडने ☐ लेखने ☐ नौकाचालने ☐

चित्रनिर्माणे ☐ पादपानाम् अङ्कुरणे ☐ व्यजनस्य चालने ☐

* एतादृशानि चत्वारि कार्याणि लिखन्तु यानि –

♦ भवान् जलेन विना कर्तुं शक्नोति।

_____ _____ _____ _____

♦ भवान् जलेन विना न कर्तुं शक्नोति।

_____ _____ _____ _____

* कस्य कृते कियत् जलम् ?

एतेषु कार्येषु सर्वाधिकं जलं यस्मिन् कार्ये व्ययीभवति, तत् कार्यं प्रथमं लिखतु। अवशिष्टानि कार्याणि अधिकात् न्यूनक्रमेण लिखतु।

कार्याणि - स्नाने, पाने, गृहप्रक्षालने, क्षेत्रे जलदाने, पिष्टस्य आपीडने।

1 _____ 2 _____ 3 _____

4 _____ 5 _____

* कुतः लभ्यते जलम्

त्वं कवितायां नदीनां, निर्झराणां, तालानां, कूपानां च विषये पठितवान्¬ । एतेभ्यः वयं जलं प्राप्नुमः । त्वं जलं कुतः कुतः आनयसि ? तव गृहे अथवा गृहस्य पार्श्वे एतेषु ये ये सन्ति, तेषु ◯ कुरु ।

सरोवरः,	कूपः,	तालः,	निर्झरः,	समुद्रः,	नदी,
कुल्या	प्रणालः,	नलिका,	नलकूपः,	टंकनः	ऊष्णस्रोतः

किं त्वं कदाचित् भूमितः उष्णजलं निर्गच्छत् दृष्टवान् ? कुत्र ?

* किं तव ग्रामे अथवा नगरे कापि नदी प्रवहति ? यदि आम्, तर्हि तस्याः नाम किम् अस्ति ? _____

* किं त्वं कासाञ्चित् नदीनां नामानि जानासि ? तासां नामानि लिख ।

_____

_____

* तव गृहे पेयं जलं कुतः आगच्छति ?
* किं जलम् आनेतुं गृहात् दूरं गन्तव्यं भवति ? जलम् आनयने कियान् समयः व्ययीभवति ?
* किं निकटस्थाः सर्वे जनाः ततः एव जलम् आनयन्ति ?
* जलभरणस्य आवश्यकता किमर्थं भवति ?
* तव गृहस्य कृते जलभरणस्य कार्यं के के कुर्वन्ति ?
* किम् एतादृशाः अपि जनाः सन्ति, येषां ततः जलं पूरयितुम् अनुमतिः न भवति ।

अनेकेषु स्थानेषु केषाञ्चित् जनानां सामुदायिक- स्रोतेभ्यः जलं स्वीकर्तुम् अनुमतिः न भवति । एतस्मिन् विषये चर्चा आवश्यकी, येन भेदभावसदृशान् विषयान् प्रति जनानां संवेदनशीलता वर्धेत ।

* अध: दत्तेषु चित्रेषु तान् वर्णेन रञ्जयतु, येषु भवान् जलं पूरयति।

* तव गृहे यदि केषुचित् अन्येषु वस्तुषु जलं पूरयित्वा स्थाप्यते, तर्हि टिप्पणी पुस्तिकायां तेषां चित्राणि निर्मातु तथा च तेषां नामानि अपि लिखतु।

चित्रेषु दत्तेषु सर्वेषु पात्रेषु यदि उपरिपर्यन्तं जलं पूरितं स्यात् तर्हि -

1 कस्मिन् पात्रे न्यूनतमं जलं भविष्यति?

2 कस्मिन् पात्रे अधिकतमं जलं भविष्यति ?

एतत् भवान् कथं कथयितुं शक्नोति ?

© NCERT not to be republished

छुटकी आश्चर्यचकिता

हिरेन: छुटकी च बहु उष्णताम् अनुभवत: स्म । पितृव्य: उक्तवान् - तिष्ठतु, अहं भवद्भ्याम् अपक्वस्य आम्रस्य रसं ददामि । स: 'स्टील' इत्यस्य चषकद्वयं पूरणं कृत्वा बालकाभ्याम् दत्तवान् । परन्तु छुटकी आग्रहम् अकरोत्– मां तु काचस्य चषके एव पाने आनन्द: आयाति । पितृव्य: आम्रस्य अपक्वं रसं काचस्य एकस्मिन् चषके पूरितवान् । परन्तु छुटकी पुन: अपि न अङ्गीकृतवती । सा उक्तवती – पितृव्य ! भवान् मह्यं न्यूनं दत्तवान् । भवन्त: किम् अनुभवन्ति ? किं छुटकी इत्यस्या: चषके न्यूनं रसम् आसीत् ?

जलं कुत: - कुतः प्राप्नुमः ? वर्गप्रहेलिकायाम् अन्वेषणं करोतु ◯ योजयतु च । किं भवान् दशानाम् अन्वेषणं कृतवान् ?

वृ	कू	पः	अ	न
ष्टिः	सा	कू	पः	लः
उ	ग	ग	रः	स
प	पु	णे	रः	रो
ने	न	स्त	शः	व
त्रम्	दी	नम्	कम्	रः

'छुटकी आश्चर्यचकिता' इति एवं कृत्वा दर्शयेत् अनन्तरं बालकान् पृच्छेत् ।

एतेषु य: पृथक् अस्ति तस्मिन् ◯ योजयतु तथा वदतु किमर्थम् ?

- नदी, पर्वत:, तडाग:, नलिका, स्रोत: ।
- स्नानम्, वस्त्रप्रक्षालनम्, तरणम्, केशप्रसाधनम्, पिष्टस्य आपीडनम् ।
- मीन:, वरट:, वानर:, मकर:, कच्छप: ।
- कारयानम्, नौका, लोकयानम्, रेलयानम्, द्विचक्रिका ।

वर्णै: क्रीडा

एकं कागदं मध्यात् आवर्तयतु । इदानीम् उद्घाट्य पृथक् पृथक् वर्णानां काञ्चन बिन्दून् पातयतु । कागदं पुन: आवर्त्य नोदयतु । उद्घाट्य पश्यतु किं निर्मितम् ?

© NCERT not to be republished

तृतीयपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		**संस्कृतशब्दाः**
झरना	-	निर्झरः
नहर	-	कुल्या
लहराना	-	दोलनम्
झील	-	सरोवरः
बाढ़	-	आप्लावम्
ट्यूबवेल	-	प्रणालः
बर्फ	-	हिमम्
ओस	-	तुषारः

4 अस्माकं प्रथमः विद्यालयः

विद्यालये वयं बहून् विषयान् शिक्षयामः अवगच्छामः च। परन्तु जानन्ति किम् अस्माकं प्रथमः विद्यालयः कः अस्ति ? सः अस्ति अस्माकं कुटुम्बः। वयं स्वकुटुम्बात् एव सर्वप्रथमं शिक्षणस्य आरम्भं कुर्मः। वयं स्वकुटुम्बेन सह एव सर्वाधिकरूपेण निकटतया संलग्नाः भवामः। परन्तु वयं तस्य विषये प्रायशः एव कदाचित् विचारयामः। आगच्छन्तु, स्वकुटुम्बस्य विषये विचारयामः चर्चां कुर्मः च।

स्वपरिवारस्य चित्रस्य निर्माणं करोतु। यदि चित्रम् अस्ति तर्हि तत् संश्लेषयतु।

* तव कुटुम्बे के – के सन्ति ? तस्य नाम तथा तस्य त्वया सह कः सम्बन्धः अस्ति, लिखतु।

नाम	त्वया सह सम्बन्धः	नाम	त्वया सह सम्बन्धः
_____	_____	_____	_____
_____	_____	_____	_____
_____	_____	_____	_____

* कुटुम्बस्य द्वयो: जनयो: परस्परं क: सम्बन्ध: इति लिखतु – यथा – पति: – पत्नी, भ्राता - भगिनी, माता - पुत्री ।

कुटुम्बस्य द्वयो: जनयो: नाम		परस्परं सम्बन्ध:	
_____	_____	_____	_____
_____	_____	_____	_____
_____	_____	_____	_____
_____	_____	_____	_____

* त्वं गृहे प्रेम्णा केन नाम्ना आहूयसे ? त्वं स्वगृहस्य जनान् कथम् आह्वयसि ?
* अत्र केषाञ्चित् जनानां चित्राणि निर्मितानि सन्ति । एतेषु द्वौ जनौ सर्वथा सदृशौ दृश्येते । एतयो: परस्परं क: सम्बन्ध: भवितुम् अर्हति ?

कुटुम्बस्य केन सह तव केषु विषयेषु समानता अस्ति – यथा भवत: ध्वनि:, भवत: नेत्रे, भवत: केशा:, भवत: गति: ? केन कथं च ?

_____ _____

_____ _____

आगच्छन्तु, अधुना अनवर्या: कुटुम्बस्य विषये किञ्चित् पठाम: । अनवर्या: कुटुम्बस्य सर्वे ज्येष्ठजना: रजकस्य कार्यं कुर्वन्ति ।

कुटुम्बस्य सर्वे सदस्या: स्वरीत्या वस्त्रप्रक्षालनम्, वस्त्रप्रसारणम्, वस्त्रसमीकरणम् इत्यादिषु कार्येषु सहयोगं कुर्वन्ति । अनवरी तथा तस्या: पितृव्यस्य सुत: तौफीक: अपि इदानीम् एतत् कार्यम् अवगच्छति ।

* किं तव कुटुम्बः अपि मिलित्वा किमपि कार्यम् अथवा व्यवसायं करोति ? यदि आम्, तर्हि किम् ?

_____

* एतस्मिन् कार्ये भवान् किं साहाय्यं कर्तुं शक्नोति ?

_____

_____

वयं कुटुम्बे परस्परं बहुः किमपि शिक्षयामः । अनवर्या: पितृव्य: तां तथा कुटुम्बस्य सर्वान् बालकान् द्विचक्रिकाया: चालनं बोधितवान् ।

त्वम् अपि स्वपरिवारात् बहु किमपि शिक्षितवान् । किं कस्मात् च ? किं कोऽपि त्वत्तः अपि किमपि शिक्षितवान् ?

कासाञ्चित् अन्यासां वार्तानां विषये विचारयतु लिखतु च यथा -

- यदा अहं खिन्ना भवामि, तदा अहं _____ पार्श्वे गच्छामि ।
- यदा अहं पुरातनानां दिनानां विषये ज्ञातुम् इच्छामि, तदा अहं _____ पार्श्वे गच्छामि ।
- यदा अहं स्वस्य रहस्यस्य वार्तां वक्तुम् इच्छामि, तदा अहं _____ पार्श्वे गच्छामि ।
- यदा अहं कम् अपि दोषं करोमि तर्हि अहं _____ पार्श्वे गच्छामि ।

पादत्राणे बहिःअवतार्य एव गृहे आगमनम् - एषा सुरेखाया: गृहस्य रीति: अस्ति। परन्तु तस्या: कानिचन मित्राणि पादत्राणे पादरक्षे च धृत्वा गृहस्य अन्तः आगच्छन्ति। एतेन व्यवहारेण सुरेखाया: पितामह: रुष्ट: भवति।

किं तव कुटुम्बे स्वस्य केचन परम्परा: सन्ति ? के के सन्ति ?

स्वस्य गृहं परिवेशं च स्वच्छं स्थापयितुं भवान् भवतः कुटुम्बः च किं कुरुतः ?

किं तव कुटुम्बे कस्यचित् कोऽपि विशेष: अभ्यास: अस्ति, यथा - उच्चै: हसनम्, प्रसन्नतायां गीतगायनम् इत्यादय: - तेषाम् इव कृत्वा दर्शय।

* भवान् स्वस्य कुटुम्बे ज्येष्ठानां सम्माननं कथं करोति ?

* **ज्येष्ठा: यदा बालका: आसन्**

गृहस्य कम् अपि ज्येष्ठं तस्य बाल्यकालस्य कम् अपि आनन्ददायकं वृतान्तं श्रावयितुं कथय।

बालकानां स्वकुटुम्बस्य सदस्यानां हसनं, गीतगायनम् इत्यादीनां रीतीनां विषये चर्चा कारणीया। एतेन ते स्वकुटुम्बस्य जनानां वैशिष्ट्यम् अपि ज्ञास्यन्ति।

चतुर्थपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
धोबी	-	रजकः
जूते	-	पादत्राणम्
चाचा	-	पितृव्यः

5 रमेशस्य गृहम्

© NCERT not to be republished



चित्रेषु रमेशस्य कथा उक्ता अस्ति। दृष्ट्वा वदतु –

- रमेश: नलिकां दृष्ट्वा किं विचारितवान् ?
- रमेश: नलिकाया: कथम् उपयोगं कृतवान् ?
- रमेश: नलिकां तथा निकटस्थं स्थानं केषु भागेषु वितरितवान् ?
- रमेश: एतस्य गृहस्य कस्मिन् भागे अधिकसमयं यापयितुम् एषिष्यति ?
- रमेश: मोहनम् अपि नलिकायां वस्तुं किमर्थम् उक्तवान् स्यात् ?

भवनं कदा गृहं भवति,एतस्मिन् विषये चर्चाकारणं 'भवनस्य' 'गृहस्य' च भेदं स्पष्टीकरिष्यति।

स्वगृहस्य चित्रस्य टिप्पणीपुस्तिकायां निर्माणं करोतु। तत् वर्णेन रञ्जयतु अपि।

* तव गृहे के के निवसन्ति ?

_____ _____ _____ _____

_____ _____ _____ _____

* रमेश: नलिकां पृथक् पृथक् भागेषु वितरितवान्। त्वम् अपि स्वस्य गृहस्य पृथक् पृथक् भागानां नामानि लिख।

_____ _____ _____ _____

_____ _____ _____ _____

* एकस्मिन् दिवसे त्वं गृहस्य कस्मिन् भागे कियन्तं समयं व्ययीकरोषि ?
* किं गृहस्य कश्चित् एतादृश: भाग: अस्ति यस्मिन् गृहस्य केचन जना: अधिकं समयं व्ययीकुर्वन्ति ?
* किं गृहस्य कोऽपि एतादृश: भाग: अस्ति यस्मिन् गृहस्य कोऽपि विशिष्ट: जन: न गच्छति एव, अथवा बहु न्यूनं गच्छति ?

अस्माकं गृहेषु वयं तु निवसाम: एव, परन्तु अस्माभि: सह केचन जन्तव: अपि निवसन्ति। केचन अस्माकं स्वेच्छया, केचन अस्माकं स्वेच्छां विना।

बालकै: सह तेषां गृहस्य वार्ता संवेदनशीलतया करणस्य आवश्यकता अस्ति। गृहाणि विविधानि - भवन्ति। इति एतम् अंशं बुद्धौ संस्थाप्य पाठे प्रकोष्ठानां स्थाने 'गृहस्य भागानां' प्रयोग: कृत: अस्ति। गृहस्य भागेषु विशिष्टानां जनानां गमनम् अथवा आगमनं तेषां गृहस्य आचारव्यवहारं दर्शयति।

प्रियं गृहम्

सर्वदा एतत् कथयति मातः !
गृहं केवलम् अस्माकं स्वकीयम् ।
परन्तु माता कथम् अहं मन्ये
गृहं तु एतत् कतीनां स्वकीयम् ।

तथा गृहगोधिकां तु पश्यतु
चलति या भ्रमणं करोति ।
अरे ! पङ्क्तीनां निर्माणं कृत्वा
कुत्र पिपीलिकाः धावन्त्यः गच्छन्ति ।



अतः एव तु कथयामि मातः !
गृहं न अवगच्छतु केवलम् अस्माकम्
सर्वकालात् कश्चित् अपि निवसति
सर्वेषाम् एव अस्ति प्रियम् एतत् गृहम् ।

पश्यन्तु तु कथम् एते मूषकाः
क्रीडन्ति धावनक्रीडाम् ।
कथं मसकाः अटनं कुर्वन्ति
कथम् आनन्देन शयिता एषा लूता ।



तथा तत्र अङ्गणे पश्यतु
पक्षिणः कथं सहसाक्रमणं कुर्वन्ति
नूनं भगिनी मादृशा च यथा
कस्मिन् विषये कलहं कुर्वन्तः सन्ति ।



* एतादृशयोः द्वयोः जन्त्वोः चित्रयोः निर्माणं करोतु, यौ अस्माकम् आज्ञां विना अस्माकं गृहेषु निवसतः। चित्रस्य अधः तयोः नाम अपि लिखतु।

_____ _____

* त्वं स्वगृहस्य कथं स्वच्छतां करोषि ?

_____

_____

_____

* तव गृहे स्वच्छतायाः कार्यं के कुर्वन्ति ? .....।
* त्वं स्वगृहस्य अवकरं कुत्र पातयसि ? .....।
* किं तव गृहं परितः स्वच्छता भवति ? .....।
* लतायाः गृहम् एवं प्रकारेण अलङ्कृतमस्ति।
* भवान् स्वगृहस्य अलङ्करणं केन अपि विशेषविधिना करोति किम् ? कदा कथं च अलङ्करोति ?

शौचालयस्य उपयोगः

सिम्मी दृष्टवती यत् तस्याः मित्रं बिल्लूः सहसा सम्यक् न अनुभवन् अस्ति। सः तया सः वार्ताम् अपि न कुर्वन् अस्ति।

सिम्मी - भोः बिल्लूः ! किम् अभवत् ? भवान् अतीव क्षीणबलः दृश्यते।

बिल्लूः- अहं न जानामि शौचालयस्य उपयोगः कथं करणीयः ? इति। शौचालयस्य उपयोगः सम्यक् न कृतं चेत् सा तथैव तर्जयिष्यति यथा सर्वदा मां तर्जयति।

सिम्मी - तर्हि भवान् शौचालयस्य उपयोगं सम्यक्तया किमर्थं न करोति ?

बिल्लूः - शौचालये पतिष्यामि इति मम भीतिः अस्ति।

सिम्मी - अरे ! कीदृशीं वार्तां करोति ! अहम् इदानीं ज्ञातवती यत् भवान् अपि च भवतः इव मम अनेकानि मित्राणि शौचालयस्य सम्यक्तया उपयोगं न कुर्वन्ति, मलिनीकुर्वन्ति च। भवान् भीतिं न करोतु, परन्तु दायित्ववान् भवतु।

✳ कथं वयं दायित्ववन्तः भवितुं शक्नुमः –

- ✳ शौचासनस्य (Toilet seat) समीचीनतया उपयोगं कुर्याम।
- ✳ उपयोगस्य अनन्तरं सर्वदा फ़्लश कुर्याम।
- ✳ आत्मानं सुष्ठुतया स्वच्छीकुर्याम।
- ✳ शौचालयगमनस्य अनन्तरं सम्यक्तया हस्तयोः क्षालनं कुर्याम।
- ✳ भवतः विद्यालये शौचालयस्य का व्यवस्था अस्ति ?
- ✳ किं शौचालयः स्वच्छः भवति ?
- ✳ एतस्य स्वच्छतां कः कथं च करोति ?
- ✳ भवान् एतस्य स्वच्छतायां केन प्रकारेण साहाय्यं करोति ?

उपयोगस्य अनन्तरं शौचालयं भवान् तथा स्थापयेत् यथा आत्मनः कृते इच्छेत्।

किं भवान् जानाति ?

महात्मगान्धिनः १५० तमस्य जन्मोत्सवस्य कृते 'स्वच्छभारताभियानम्' इत्यस्य आरम्भः कृतः। एतत् अस्मान् बोधयति यत् स्वच्छता न केवलम् अस्माकं दायित्वम् अपि तु अस्माकं कर्तव्यम् अपि अस्ति।

इतः परं बिल्लूः अपि शौचालयस्य सम्यक् उपयोगम् आरब्धवान्। उपयोगस्य अनन्तरं बिल्लूः शौचालयं स्वच्छीकृत्य स्वस्य हस्तौ अपि सम्यक्तया स्वच्छीकरोति स्म।

* किं भवते अपि कस्मिंश्चित् स्वच्छ-शौचालये एव गमनं रोचेत। स्वस्य उपयोगस्य अनन्तरं तं तथैव स्थापयिष्यति यथा भवते अपेक्षितम् ?
* भवान् कदा अनुभवति यत् मम हस्तौ मलिनौ भविष्यतः इति।
* आत्मानं स्वच्छं स्थापयितुं भवता किं किं करणीयम् ? सूचीं निर्मापयतु।
  * स्नानं दन्तधावनं च।
  * नखकर्तनम्
  * ----------
  * ----------
* यदि वयम् एतत् सर्वं न कुर्याम तर्हि किं भवेत् ?

* भवान् स्वस्य गृहस्य अवकरान् कुत्र क्षिपति ?
* किं भवतः गृहस्य परिवेशः स्वच्छं भवति ?

लतायाः गृहम् अनेन प्रकारेण सुसज्जम् अस्ति।

किं भवान् स्वस्य गृहस्य केनाऽपि विशिष्टप्रकारेण सज्जां करोति ? कदा अपि च कथं सज्जां करोति ?

स्वमित्रेभ्यः अवगच्छन्तु यत् ते स्वकीयानि गृहाणि कदा कथं च अलङ्कुर्वन्ति ?

भवान् स्वगृहं कैः वस्तुभिः अलङ्करोति ? तेषां वस्तूनां नामानि अपि लिख।

पाठे प्रत्येकः अपि बालः तस्य गृहस्य मण्डनविषये पृष्टः अस्ति। बालकैः सह गृहमण्डनप्रक्रियायाः चर्चया स्थानीय-सामग्र्याः उपयोगः तथा च पर्व- आचरणस्य महत्त्वं बोधयितुं शक्यते।

पञ्चमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
पकड़म-पकड़ी	-	धावनक्रीडा
मच्छर	-	मशकः
टहलना	-	अटनम्
मकड़ी	-	लूता
छिपकली	-	गृहगोधिका
आँगन	-	अङ्गणम्
झगड़ा	-	कलहः

6 भोजनं स्वकीयम् - स्वकीयम्

ह्य: रात्रौ अहं वज्रकस्य रोटिका: गुडं च खादितवान्।
अहं तु ह्य: सूपम् ओदनं च निर्मितवती।
मम गृहे तु ह्य: भोजनम् एव न निर्मितम्।
वयं भगिन्या सह गुरुद्वारम् अगच्छाम,तत्र एव भण्डारगृहे सूपं रोटिकां च अखादाम।
माता पायसं शष्कुली च निर्मितवती, यत् मह्यं न रोचते। अत: अहं तु भर्जिताण्डं खादित्वा शयनं कृतवती।
मम माता मांसं निर्मितवती। अहं बहु खादितवती, बहु शोभनम् आसीत्।
मम माता यस्मिन् गृहे कार्यं करोति, तत: 'नूडल्स'खाद्यं आनीतवती। सर्वे आनन्दं प्राप्तवन्त:।

त्वं ह्य: किं - किं खादितवान् ? अध: दत्तायां स्थालिकायां तेषां नामानि लिख ।



स्वस्य स्वस्य स्थालिकायां यत् लिखितम् अस्ति, तत् कृष्णफलके लिख ।

* किं तव कक्षायां ह्य: सर्वे समानं भोजनं खादितवन्त: ? एतादृशं किमर्थम् ?
* चित्रे (36 तमेपृष्ठे) त्वया दृष्टं यत् एकस्य बालस्य गृहे भोजनम् एव न निर्मितम् । एतत् केन कारणेन भवितुम् अर्हति ?

* किं त्वया सह कदापि एवम् अभूत् यत् बुभुक्षा स्यात् परं भोक्तुं किमपि न लब्धम् ? अस्ति चेत् किमर्थम् ?
* बुभुक्षा जाता इति त्वं कथं जानासि ?
* यदा त्वं बुभुक्षित: भवसि तदा कथम् अनुभवसि ?

बालका: एकस्मिन् मुक्त-वातावरणे स्वकीयां वार्तां निसङ्कोचेन कथयन्ति । अन्यान्यस्य भोजनस्य विषये श्रुत्वा वयं स्वभोजनसम्बद्धां सङ्कुचितां विचारधाराम् अपाकर्तुं शक्नुम: । एतेन अन्येषां जनानां विषये अस्माकम् अवगमनं वर्धिष्यते । बालकै: सह सम्बन्धः तथा च एतादृशस्य वातावरणस्य निर्मितिः आवश्यकी अस्ति यत्र तेषां वार्ताः संवेदनशीलतया श्रूयेरन् ।

स्वकीयं-स्वकीयं भोजनम्

विपुलस्य कुटुम्बस्य केचन जना: कानिचन वस्तूनि न खादन्ति, यानि स: खादति। विचारयन्तु तस्य कुटुम्बस्य जना: तानि वस्तूनि खादन्ति एव न अथवा खादितुं न शक्नुवन्ति ?

आगच्छन्तु विपुलस्य कुटुम्बस्य विषये पठाम: -

विद्यालयात् गृहं निर्गच्छन् विपुल: एकं मकायकणिशं क्रीतवान्। मकायकणिशं खादन् विपुल: गृहे प्रविष्ट: तथा मातरं पृष्टवान् - मात: ! छुटकी कुत्र अस्ति ? प्रथमं तु अहं ताम् एव द्रक्ष्यामि।

माता हसन्ती उक्तवती - छुटकी उपरि प्रकोष्ठे अस्ति।

विपुल: पितामह्या: हस्तं गृहीत्वा अवदत् –पितामहि ! भवती अपि चलतु।

माता अवदत् –तिष्ठ, अहं मातु: रोटिका: सूपे स्थापितवती अस्मि। प्रथमं सा खादेत्।

वत्स ! अद्य तु सूपे शर्करां सम्यक्तया मेलितवान् किल ? अत्र नागपुरम् आगत्य भवन्त: स्वकीयं भोजनं विस्मृतवन्त: भवन्ति - पितामही मातरम् उक्तवती।

माता उत्तरं दत्तवती – मात: ! अहम् आस्वादनं कृत्वा दृष्टवती, समीचीन: निर्मित: अस्ति।

अहं पितामह्या: भोजनम् अपि उपरि नयामि - एवं कथयन् विपुल: स्थालिकाम् उत्थापितवान् तथा शीघ्रतया सोपानेषु आरोहणं कृतवान्। पितामहि ! शीघ्रम् आरोहतु – विपुल: आहूतवान्।

पितामही उक्तवती- यदा अहं तव वयसि आसम्, तदा अहम् एतावति समये सोपानानि तु किं पर्वतस्य आरोहणं करोमि स्म।

विपुल: अन्तः गत्वा स्वकीयं मकायकणिशं दत्तवान् , तथा हस्तौ प्रक्षाल्य छुटकीम् उत्थापितवान्।

सहसा छुटकी रोदनं प्रारब्धवती।

अधुना एषा एवं शान्ता न भविष्यति, एषा बुभुक्षिता अस्ति - एवं कथयन्ती मातुलानी छुटकीं दुग्धं पाययितुम् उपविष्टा।

* पितामही सोपानेषु शीघ्रतया आरोढुं किमर्थं न शक्तवती ?
* पितामह्यै सूपभक्षणं केन प्रकारेण रोचते ?

* कथायां यावन्त: जना: आगता:, तेषु कियन्त: जना: मकायकणिशानि खादितुं शक्नुवन्ति ? किमर्थं च ।
* किं सर्वे वृद्धजना: मकायकणिशं न खादितुं शक्नुवन्ति ?
* चतुर्मास-पर्यन्तं छुटकी केवलं स्वमातु: दुग्धम् एव पास्यति । तत् एव तस्य भोजनम् अस्ति । विचारयन्तु, किमर्थम् ?

स्वस्य परिवेशस्य ज्येष्ठजनान् पृष्ट्वा तालिकां पूरयन्तु –

	किं खादितुं पारयन्ति	किं खादितुं न पारयन्ति
बालक:	_____ _____	_____ _____
युवती	_____ _____	_____ _____
वृद्ध:	_____ _____	_____ _____

कानिचन वस्तूनि भोक्तुं शक्यानि कानिचन अशक्यानि च इति एषा आसीत् चर्चा । किं वयं तानि सर्वाणि वस्तूनि खादाम: यानि वयं खादितुं शक्नुम: ? नैव खलु !

आगच्छन्तु वार्तां कुर्म: तेषां वस्तूनां यानि वयं खादाम: ।

* यानि वस्तूनि त्वम् अधिकं खादसि तेषु ◯ योजय ।

तण्डुल:	रागी	कणिशम्	वज्रक:
गोधूम:	यवी	कप्पा	यव:

अस्माकं भोजनम् अधिकतया एभि: वस्तुभि: निर्मितं भवति । पृथक् - पृथक् स्थानेषु एतेषु कानिचन वस्तूनि जना: अधिकं खादन्ति । येषां वस्तूनां यत्र सरलतया उत्पादनं भवति, तत्र तेषां वस्तूनां भोजने अधिक: प्रयोग: भवति ।

अवगच्छन्तु, एतेषु केषां वस्तूनां कुत्र अधिकतया उपभोग: भवति।

वयं विभिन्नानि खाद्यस्तूनि तु खादामः एव । एकस्य एव खाद्यवस्तुनः उपयोगं कृत्वा भिन्नं भिन्नं भोजनम् अपि निर्मामः । अवगच्छन्तु अपि च लिखन्तु यत् गोधूमेन तण्डुलेन च किं किं निर्मितं भवति ?





किं भोः ! कति वस्तूनि लिखितानि ? अनेन एव प्रकारेण विभिन्नेषु स्थलेषु विभिन्नप्रकारकाणि द्विदलानि, शाकानि, फलानि, मांसादिकानि च खाद्यन्ते। केभ्यश्चित् किञ्चित् एकं खाद्यवस्तु रोचते चेत् अन्येभ्यः किञ्चित् अन्यत् रोचते। अधुना वार्तां कुर्मः 'रुचेः' 'अरुचेः' च।

स्वस्व-अभिरुचय:

तेषां त्रयाणां वस्तूनां नामानि लिखतु येषां खादने भवत: अभिरुचि: अस्ति तथा एतादृशानां त्रयाणां वस्तूनाम् नामानि अपि लिखतु येषु भवत: अभिरुचि: नास्ति।

अभिरुचि: _____ _____ _____

अनभिरुचि: _____ _____ _____

- किं तव अभिरुचि: अथवा अनभिरुचि: तव परिवारस्य जनै: सह तुल्यम् अस्ति ?
- किं तव अभिरुचि: अथवा अनभिरुचि: तव मित्राणाम् अभिरुच्या अथवा अनभिरुच्या सह तुल्यम् अस्ति।

आगच्छन्तु अधुना कैश्चित् जनै: सह वार्तां कुर्म: तथा जानीम: ते भोजने किं खादितुम् इच्छन्ति ?

अहं हांगकांगदेशे निवसामि। मह्यं मम मात्रे च सर्पभक्षणं बहु रोचते। यदा कदा अपि आवयो: सर्पखादनस्य इच्छा भवति, तदा आवां निकटस्य एकं भोजनालयं गत्वा 'लिंग-हू-फेन' इति सर्पं खादाव:।

अहं कश्मीरे निवसामि। सर्षपस्य तैले निर्मिता मत्सी मह्यं बहु रोचते। एकवारं वयं गोवानगरं गतवन्तःतत्र वयं मत्सीम् खादितवन्तः, परन्तु स्वाद: सर्वथा भिन्न: आसीत्। माता अवदत् – अरे ! एषा तु नारिकेलस्य तैले निर्मिता समुद्रस्य मत्सी अस्ति। स्वाद: तु भिन्न: भविष्यति एव !

अहं केरले निवसामि। मह्यं वस्तुद्वयं अत्यन्तं रोचते। तद् वस्तुद्वयं मम गृहस्य प्राङ्गणे एव उत्पद्यते। एकम् उपरि उन्नते वृक्षे द्वितीयं भूमे: अध:। नारिकेलमिलितं किमपि करी खाद्येन सह क्वथितं कप्पा मिलेत् तर्हि कियान् आनन्द: आगच्छेत्।

कुत्र किं खाद्यते इति एतत् किमाश्रितं भवति ? दत्तेषु कारणेषु यत् कारणं त्वम् उचितं मन्यसे तत्र '✓' योजय। एतदतिरिच्य अन्यानि इतोऽपि कारणानि भवितुम् अर्हन्ति तानि रिक्तस्थाने लिख।

- तत्र किं सरलतया लभ्यते ?
- किं क्रेतुं शक्नुम: ?
- तत्रत्याः आचारव्यवहारा: कीदृशा: भवन्ति ?
- _____
- _____

* यानि वस्तूनि खादितुं योग्यानि सन्ति तेषु '✓' इति चिह्नं योजय। कस्यचित् वस्तुन: विषये न जानासि तर्हि शिक्षकं पृच्छ।

कदलीवृक्षस्य पुष्पाणि	☐	कुक्कुट्याः अण्डम्	☐	पुष्पशाकम्	☐
'सैंजन' इति वृक्षस्य पुष्पाणि	☐	तीक्ष्णकन्दस्य पत्राणि	☐	मांसम्	☐
'खुंबी' इति मूषक:	☐	मूषकः	☐	कालाजाजी	☐
कमलनालः	☐	मीन:	☐	कर्कटः	☐
रक्तपिपीलिका	☐	वज्रकस्य रोटिका	☐	घास:	☐
गतदिनस्य रोटिका	☐	मण्डूक:	☐	आमलकम्	☐
नारिकेलस्य तैलम्	☐	उष्ट्रया: दुग्धम्चणकस्य रोटिका	☐	चणकरोटिका	☐

* खादनस्य केषाञ्चित् एतादृशानां वस्तूनां नामानि लिखतु, यानि त्वं कदापि न खादितवान्, परन्तु तानि खादितुं तव मन: करोति।

_____ _____ _____ _____

_____ _____ _____ _____

षष्ठपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
भुट्टा	-	मकायकणिशम्
बाजरा	-	बज्रकम्
जई	-	यवी
जौ	-	यवः
पुलाव	-	शाकोदनम्
हलवा	-	संयावः
मेंढ़क	-	मण्डूकः

7 अनुक्त्वा वार्ता

त्वं तूष्णीं भव, वयं तूष्णीं भवेम

चलन्तु, एकां क्रीडां क्रीडाम: । एतस्यां क्रीडायाम् अस्माभि: सर्वै: स्वकीया वार्ता अनुक्त्वा अन्यान् प्रति प्रापणीया अस्ति । सर्वे बालका: सप्तसमूहयोः विभक्ता: भवन्तु ।

एतस्यां क्रीडायां भवताम् अध्यापिका सर्वेभ्य: समूहेभ्य: एकैकां कर्गदस्य चिटिकां दास्यति । प्रत्येकस्यां चिटिकायां किमपि लिखितं स्यात् । सर्वे स्वकीये समूहे चिटिकां पठिष्यन्ति । सर्वान् समूहान् चिटिकाया: अनुसारं मूकनाटकस्य प्रदर्शनं करणीयम् अस्ति । एतस्या: वार्तायाः अवधानं करणीयम् अस्ति यत् अनुक्त्वा एव सर्वान् प्रति स्वकीया वार्ता प्रापणीया अस्ति । युष्माभि: स्वशरीरस्य पृथक् पृथक् अङ्गै: एव स्वकीया वार्ता कथनीया अस्ति, यथा– नेत्राभ्याम्, मुखस्य भाव-भङ्गिमया, हस्तयो: सङ्केतै: ।

यदा सर्वेषां नाटककानि सिद्धानि भवेयु: तदा सर्वे समूहा: क्रमेण आगच्छन्तु तथा सर्वेषां समक्षं स्वकीयं मूकनाटकं प्रदर्शयन्तु । सर्वान् दर्शकान् एतत् प्रष्टव्यं यत् नाटके किं प्रचलति ।

कथम् अनुभूता एषा क्रीडा ?

सम्भाषणं विना नाटककरणे कठिनता आगता किम् ?

अग्रिमे पृष्ठे दत्तं चित्रं पश्यतु । चित्रे बाला: सङ्केतै: वार्तां कुर्वन्ति ?

* त्वं कदापि कम् अपि सङ्केतै: वार्तां कुर्वन्तं दृष्टवान् ?
* किं जनानां सङ्केतै: वार्ताकरणस्य कदा आवश्यकता भवति ?

या: घटना: बालका: अवगच्छेयु:, याभि: आत्मानं योजयेयु:, ता: चिनुयात् येन बालका: ता: प्रभावरीत्या नाटकरूपेण प्रस्तोतुं शक्नुयु: ।

अस्मासु अधिकांशजना: वक्तुं श्रोतुं च शक्नुवन्ति । परन्तु केचन एतादृशा: अपि जना: सन्ति ये वक्तुं श्रोतुं च न शक्नुवन्ति । एतादृशा: जना: अन्यान् स्व-वार्ता: सङ्केतै: बोधयन्ति । अन्येषां वार्ता: ते तेषाम् ओष्ठौ दृष्ट्वा अवगन्तुं प्रयत्नं कुर्वन्ति ।

वयम् अपि तु सर्वं कर्तुं न शक्नुम: । अस्मासु अपि कश्चित् सम्यक् गायति , कश्चित् कवितां सम्यक् लिखति । केचन बालका: शीघ्रतया वृक्षे आरोहणं कुर्वन्ति, तु केचन बहु तीव्रगत्या धावन्ति । कश्चित् चित्रं सम्यक् निर्माति, अन्या काचित् मधुरस्वरेण गातुं शक्नोति । अस्मासु सर्वेषु पृथक्-पृथक् वैशिष्ट्यम् अस्ति । विद्यालय: एतदर्थम् एव अस्ति यत् सर्वान् परस्परं किञ्चित् अवगन्तुम् अवसर: मिलेत् । सर्वेषाम् इव ये बालका: वक्तुं श्रोतुं न शक्नुवन्ति, ते अपि विद्यालयं गत्वा पठन्ति लिखन्ति च । एतान् बालकान् विद्यालये सङ्केतै: वार्ताकरणस्य भाषा पाठ्यते ।

आगच्छन्तु, अधुना एकस्या: बालिकाया: विषये पठाम: या श्रोतुं न शक्नोति । सा बालिका तथापि कियत् अधिकं कर्तुं शक्नोति ।

मम भगिनी श्रोतुं न शक्नोति

मम एका भगिनी अस्ति ।
मम भगिनी श्रोतुं न शक्नोति ।
मम भगिनी अद्वितीया अस्ति ।
बहु अल्प-जनानां भगिन्य: एव
मम भगिनीसदृशा: भवेयुः ।
मम भगिनी तन्त्रीकवाद्यं वादयितुं शक्नोति ।
सा तन्त्रीकवाद्यस्य सुरान्
सा अङ्गुलिभि: स्पृष्ट्वा जानाति
अनुभवितुं शक्नोति ।
यत् आकाशवाणी चलति अथवा
सा पिहिता अस्ति ।
कूर्दने, उत्प्लवने तथा विपर्यस्तप्लुतौ
सा बहुः आनन्दम् अनुभवति ।
मम भगिनी अधुना मम
विद्यालयम् एव गच्छति ।

यद्यपि माता, तां गृहे वदनस्य तथा
ओष्ठौ पठनस्य प्रशिक्षणं ददाति
कक्षायाम् अध्यापक: तथा अन्ये बालका: मम
भगिन्या: उक्तान् सर्वान् शब्दान्
अवगन्तुं न पारयन्ति ।
सा यत् किञ्चित् कथितुम् इच्छति तत् सा
सम्यक्तया कथितुं न शक्नोति ।
ह्य अहम् आतपस्य उपनेत्रं धृतवान् आसम्
तस्य उपष्टम्भ: पर्याप्त: विशाल: आसीत् ।
तस्यकाचौ अपि पूर्णतया कृष्णौ आस्ताम् ।
यदा अहं वदामि स्म तु मम भगिनी
माम् उपनेत्रम् अवतारितुम् उक्तवती ।
मम धूसरनेत्रे, तस्या: धूसरनेत्रे
न जाने किं किं कथयत: ?
- 'जीन-वाइटहाउस-पीटरसन' इत्यस्य
कविताया: केचन अंशा:
(अनुवादक: :- अरविन्द-गुप्त:)

अनेन पाठेन चर्चयितुं शक्नुमः यत् अस्माकं सर्वेषां भिन्नाः भिन्नाः क्षमताः भवन्ति । बालानां स्वानुभवान् सम्मेलयन् विषयेऽस्मिन् संवेदनशीलतां वर्धयितुं शक्यते ।

वयं स्व-नेत्राभ्यां बहुः अधिकं कथयामः। लघु-बालकाः तु भाषणात् प्राक् एव कियत् अधिकं कथयन्ति – मुखेन, हस्ताभ्याम्। ते कियत् अधिकम् अवगच्छन्ति अपि।



मुखम् अस्ति दर्पणः

स्वपरिवेशस्य लघून् बालकान् (प्रायः 6 – 8 मासीयान्) पश्यतु। ते स्वकीयां वार्ताम् अनुक्त्वा कथं कथयन्ति ?

भवान् चिन्तयन् स्यात्। यत् एतानि कीदृशानि मुखानि सन्ति ? एतेषु नेत्राणि न सन्ति, नासिकाः अपि न सन्ति नापि च मुखानि एव। एतत् सर्वं तु त्वं निर्मास्यसि, परन्तु सहैव यत् लिखितम् अस्ति, तं पठित्वा।

एषः आफ़ताबः अस्ति। तस्य क्रीडनकं पतित्वा भग्नं जातम्। सः दुःखी अस्ति।
कथं भवेत् तस्य मुखम् ?



एषा जूली अस्ति। ह्य: एव तस्या: अनुजा जाता। सा बहु प्रसन्ना अस्ति। तस्या: मुखस्य निर्माणं करोतु।

एषा यामिन्या: माता अस्ति । अद्य यामिनी यदा पाकशालात: अवलेहस्य काँचकूपीं निष्कासितवती, काँचकूपी पतित्वा भग्ना अभवत्। मातु: मुखस्य निर्माणं करोतु।

एषा रेहाना अस्ति । रेहाना कुक्कुरेभ्य: बहु बिभेति । सा क्रीडति स्म। सहसा तस्या: समक्षं एक: कुक्कुर: आगत:। कथं भवेत् रेहानाया: मुखम् ?

स्वभावनाः विविधप्रकारेण व्यक्तीकर्तुं बालान् प्रेरयन्तु । एतेन बालेषु सृजनात्मक्याः क्षमतायाः विकासः भविष्यति।

© NCERT not to be republished

मुखं दृष्ट्वा वयं जानीम: यत् क: दु:खी अस्ति, क: प्रसन्न: अस्ति तथा क: क्रुद्धः अस्ति। त्वया सह कदापि एतादृशम् अभवत् यत् त्वं काञ्चित् दुष्टतां कृतवान् तथा माता तव मुखं दृष्ट्वा एव ज्ञातवती स्यात् ?

नृत्येन अपि वयं स्व-वार्ताम् अन्यान् प्रति प्रेषयितुं शक्नुम:। नृत्ये सङ्केतानां तथा मुखस्य भाव-भङ्गिमानां च प्रयोगं कुर्वन्ति। एता: मुद्रा: कथ्यन्ते।

अध: नृत्यस्य काश्चन मुद्रा: दत्ता: सन्ति। वदन्तु, एता: मुद्रा: किं प्रदर्शयन्ति।

नृत्यस्य काश्चन मुद्रा: त्वम् अपि अवगच्छ तथा च कृत्वा दर्शय।



© NCERT not to be republished

चित्रं दृष्ट्वा, स्व-मनसा कथायाः निर्माणं करोतु, स्व-मित्राणि श्रावयतु,अपि च तस्मिन् विषये चर्चाम् अपि करोतु।



सप्तमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
पर्ची	-	चिटिका
कागज	-	कागदः
खिलौना	-	क्रीडनकम्
अचार	-	अवलेहः
शीशी	-	काँचकूपी
पियानो	-	तन्त्रीकवाद्यम्
फ्रेम	-	उपष्टम्भः
भूरी आँख	-	धूसरनेत्रम्

८ पक्षौ प्रसार्य उड्डीयन्ताम्

'कुहू-कुहू' इति ध्वनिं करोमि,
मधुराणि अहं गीतानि श्रावयामि।
सर्वेषां मनांसि अहं हरामि,
पश्यन्तु -------- अहं कथ्ये।
मृतान् जन्तून् खादित्वा अहम्,
स्थानस्य स्वच्छतां करोमि।
उन्नते ------- अहम् उड्डयामि।
गृध्रः अहं कथ्ये।
वर्णः धूमलः, पादाग्राणि ------,
'गुटर गूँ' इत्यस्य पूरयित्वा
कुञ्चिकाम्।
आदिनं कोलाहलं करोमि,
-------- अहं कथ्ये।
चञ्चूः मम अस्ति,बहु विचित्रा,
सूची भवेत् यथा सीवनस्य।
पत्राणि प्रसीव्य गृहं निर्माणि,
---------- चटका अहं कथ्ये।
वृक्षस्य ------ छिद्रं निर्माणि,
तस्मिन् गुप्तान् कीटान् खादानि,
'टुक-टुक' इति कुर्वन् गच्छामि,
काष्ठकुट्टः अहं कथ्ये।

उलूक: उक्तवान् – अधुना पिहितं किमर्थं न कुर्वन्ति एष: कोलाहल: ? एष: कीदृश: कलह: ? अस्मासु किमपि वैशिष्ट्यम् अस्ति । अस्माकं पक्षा:, पादा:, चञ्चव: वाण्य: च भवतु पृथक्-पृथक् सन्ति, परन्तु वयं सर्वे पक्षिण: स्म: । विचारयन्तु, अस्माकं स्वरूपं भोजनं च यदि समानम् अभविष्यत् । वाणी अपि यदि समाना अभविष्यत्, तर्हि कियत् नीरसम् अभविष्यत् अस्माकम् एतत् जगत् !

* पाठे आगतेषु पक्षिषु त्वं कान् दृष्टवान् ? तेषां नामानि लिख ।

_____ _____ _____ _____

_____ _____ _____ _____

अधुना बहि: गत्वा पश्य त्वं कियत: पक्षिण: पश्यसि । वृक्षे एव न, क्षेत्रे, जले, जलस्य समन्तात् तथा कण्टस्तम्बेषु अपि पश्य ।

* पक्षिणां नामानि पूरय तथा च उचिते स्थाने '✓' इति चिह्नं योजय । यदि नामानि न जानासि तर्हि तेषां किमपि अभिज्ञानं लिख ।

बालका: बहि: पक्षिण: द्रक्ष्यन्ति तर्हि कागदे सरलतया अभिज्ञानं कर्तुं शक्नुवन्ति । कवितां वर्धयितुं बालकाः पक्षिणां गुणानां ज्ञानेन साहाय्यं प्राप्स्यन्ति, ते तेषां नामानि न जानन्ति चेत् अपि ।

पक्षिण: नाम	यत्र दृष्टम् अस्ति				
	जले	वृक्षे	भूमौ	गृहे	उड्डयमाना:

किं त्वं कदापि अवधानं दत्तवान् यत् पृथक्-पृथक् पक्षिणां चञ्चव: अपि पृथक्-पृथक् भवन्ति ? अध: केषाञ्चित् पक्षिणां चञ्चूनां चित्राणि सन्ति । एतानि अवधानेन पश्य अभिज्ञानं कुरु च । एते केषां पक्षिणां चञ्चव: सन्ति । अध: तेषां नामानि लिख । अग्रिमे पृष्ठे रिक्तस्थाने कस्यचित् अन्यस्य पक्षिण: चञ्च्वो: निर्माणं कुरु तथा तस्मिन् वर्णं पूरय । तस्य पक्षिण: नाम अपि लिख ।

_____ _____ _____

बालकानां पक्षिषु रुचिं वर्धयितुं, बालका: मौनेन उपविश्य पक्षिण: पश्येयु: । तथा च स्वकीयावलोकान् बिन्दुश: लेखितुम् अपि शिक्षेयु: ।

दृष्टम्, पक्षिणां चञ्चव: कियत्य: विविधाः भवन्ति। तावत् एव विविधं भवति तेषां भोजनम्। पक्षिण: विविधानि वस्तूनि खादन्ति। कश्चित् फलानि खादति, अन्यः कश्चित् बीजानि। कश्चित् कीटान् –पिपीलिकान् खादति, चेत् कश्चित् मीनान् खादति।

चित्रे दत्तानां पक्षिणां भोजनेन सह योजयतु।



किं त्वं कदापि अवधानं कृतवान् यत् पक्षिणाम् उड्डयनस्य, चलनस्य ग्रीवाया: आवर्तनस्य च विधय: पृथक् पृथक् सन्ति इति। सारिका प्रणोदेन स्वकीयां ग्रीवाम् अग्रे - पृष्ठे करोति। उलूक: तु स्वकीयां ग्रीवां पृष्ठ-पर्यन्तम् आवर्तितुं शक्नोति। किं त्वम् अपि एवं कर्तुं शक्नोषि ?

अनेके एतादृशा: पक्षिण: सन्ति, ये अस्माकं वाण्या: अनुकरणं कर्तुं शक्नुवन्ति। किं त्वम् एतादृशस्य कस्यचित् पक्षिण: नाम जानासि ? तस्य चित्रस्य स्वस्य टिप्पणी पुस्तिकायां निर्माणं कुरु। तस्य नाम अपि लिख।

बहि: मुक्तस्थाने गच्छ। पक्षिण: पश्य यत् ते कथं चलन्ति, तेषां पक्षा: कथं भवन्ति तथा ते ग्रीवां कथम् दोलयन्ति अनुकरणं कुरु। स्वकीयानि मित्राणि कथय यत् ते अभिजानीयु: त्वं कस्य पक्षिण: अनुकरणं कृतवान्।

पक्षिणां पक्षा: पृथक्-पृथक् वर्णानाम् अभिकल्पानां च भवन्ति। तेषां पक्षा: उड्डयने साहाय्यं कुर्वन्ति। एतावत् एव न, पक्षा: तेषां शरीराणि उष्णानि अपि कुर्वन्ति। समये-समये पक्षिणां पुरातना: पक्षा: पतन्ति तथा नूतना: पक्षा: आयान्ति। त्वम् अपि अनेकवारं पक्षिणां पतितान् पक्षान् दृष्टवान् स्या:।

पक्षिणां पतितान् पक्षान् एकत्रीकुरु तथा तेषां रङ्गस्य, आकारस्य आकृते: च विषये चर्चां कुरु। एकस्य पक्षिण: चित्रं स्वस्य टिप्पणीपुस्तिकायां निर्माहि तथा तस्यां पक्षान् संश्लिश्य तस्य नाम अपि लिख।

* पक्षिण: विहाय अन्ये के के जन्तव: उड्डयितुं शक्नुवन्ति ?

_____ _____ _____

_____ _____ _____

* यदि त्वम् अपि पक्षिणाम् इव उड्डयनं कर्तुम् अशक्ष्यः, तर्हि त्वं कुत्र अगमिष्यः ? किम् अकरिष्यः ?

_____

_____

_____

_____

यदि पक्षिणः उड्डयनं कर्तुं न शक्नुयुः, केवलं स्व-पादाभ्याम् एव चलेयुः तर्हि किं स्यात् ?

आगच्छ कुक्कुटं निर्मामः

एकं चतुष्कोणं कागदं स्वीकुरु।

1 एतं चित्रानुसारं बिन्दुस्थानेभ्यः आवर्तयतु।

२ चित्रे दर्शितैः बिन्दुभिः कागदम् अर्धम् आवर्तयतु।

3 इदानीं कागदं बिन्दुरेखातः सरचिह्नं प्रति आवर्तयतु।

4 चित्रे दर्शितेन विधिना कागदम् आवर्त्य कुक्कुटस्य चञ्च्वोः निर्माणं करोतु।

5 इदानीम् एकं रक्तवर्णीयं कागदं कुक्कुटस्य पिच्छस्य आकारे कर्तयित्वा तस्य शिरसि संश्लेषयतु।

एकं लघुकर्गदं गोलं कर्तयित्वा कुक्कुटस्य नेत्रस्य स्थाने संश्लेषयतु।

अलम्, तव कुक्कुटः निर्मितः !











Published

अष्टमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
शोरगुल	-	कलहः
झाडी	-	कण्टकस्तम्बः
झटके से	-	प्रणोदनेन
चोंच	-	चञ्चूः
पहचानना	-	अभिज्ञानम्

9 मेघाः आगतवन्तः, वृष्टिम् आनीतवन्तः



श्यामः कदलीफलम् अखादत्

श्यामाय गजाय कदलीफलानि बहु रोचते । सः प्रतिदिनं कदलीवृक्षेभ्यः कदलीफलानि त्रोटयित्वा खादति ।

एकस्मिन् दिने सः दृष्टवान् यत् कदलीवृक्षाः म्लायन्ति । यतो हि बहु-दिनेभ्यः वृष्टिः न जाता ।

श्यामः अवदत् - अहम् अधुना एव स्व शुण्डायां जलं पूरयित्वा आनयामि ।

सः नदीं प्रति चलितुम् आरब्धः । श्यामः नद्याः स्वेच्छानुसारं जलं पीतवान् । शुण्डायां जलं पूरयित्वा सः बहु स्नातवान् ।



अनन्तरं शुण्डायां जलं पूरितवान् तथा गत्वा कदलीवृक्षाणाम् अपि स्नानं कारितवान् ।

जलं प्राप्य कदलीवृक्षाः प्रफुल्लिताः जाताः । श्यामः अवदत् – अधुना अहं प्रतिदिनं युष्माकं कृते जलम् आनेष्यामि, यूयं मह्यं मधुराणि कदलीफलानि यत् दत्थ ।

* श्याम: कथं ज्ञातवान् यत् कदलीवृक्षा: जलम् इच्छन्ति ?

* तव गृहं परितः वृक्षपादपा: जलं कुत: प्राप्नुवन्ति ?

* श्याम: गज: नद्या: स्वेच्छानुसारं जलं पीतवान् । त्वं जन्तून् कुत्र कुत्र जलं पिबत: दृष्टवान् ?

* किं त्वं कदापि कम् अपि जन्तुं जलं पायितवान् ? यदि आम्, तर्हि कम् ?

* यान् जन्तून् कोऽपि जलं न पाययति, ते जलं कुत: पिबन्ति ?

कथायां त्वं पठितवान् यत् कदली वृक्षाय श्याम: गज: जलं दत्तवान् । वस्तुत: गजा: वृक्षेभ्य: एवं जलं न ददति । पुन: ते वृक्ष-पादपाः जलं कुत: प्राप्नुवन्ति, येभ्य: कोऽपि जलं न ददाति ?

वृक्ष-पादपाः अधिकांशतया जलं वृष्ट्या प्राप्नुवन्ति । वृष्टिसमनन्तरं वृक्ष-पादपा: प्रफुल्लिता: भवन्ति । आगच्छ, वृष्टे: विषये एकां कवितां पठाम: ।



मेघाः आगताः

गौराः - गौराः, कृष्णाः - कृष्णाः,
मेघाः आगताः चमत्कारिणः ।
कुक्कुरः - धेनुः
गजः - तुरङ्गः
अथ कदाचित्
हंसयुगलम्
उत भूत्वा वन्यमहिषाः
धाविष्यन्ति सम्भूय उन्मत्ताः ।
क्षणे आयान्ति
क्षणे गच्छन्ति
मासेषु न दृश्यन्ते ।
अपि च कदाचित् तिष्ठन्ति एवम्
सप्ताह-पर्यन्तं न गच्छन्ति ।
कदाचित् गर्जन्ति, कदाचित् वर्षन्ति ।
इन्द्रधनुषः वर्णाः प्रसरन्ति
कृत्वा कदाचिच्च करकावृष्टिं
त्रोटितवन्तः काचान् चषकान् ।

हरीशनिगमः
चकमकः (एकलव्यः)

कविः मेघेषु बहु किमपि दृष्टवान्। किं त्वया अपि मेघेषु कदाचित् किमपि दृष्टम् ?

* मेघाः किं किं कुर्वन्ति ?
* जलवृष्टौ सति त्वं कथम् अनुभवसि ?
* जलवृष्टौ सति मेघानाम् अतिरिक्तम् अन्यत् किं किं दृश्यते ?
* किं त्वं कदापि इन्द्रधनुः दृष्टवान्। इन्द्रधनुः कदा दृश्यते ?
* जलवृष्टौ सति किं किं भवति ?

वृष्टेः आगमने नौकायाः निर्माणे तथा तस्याः जले चालने बहु आनन्दः आगच्छति किल ? कागदस्य नौकां रचय तथा तस्याः जले तरणं कारय।

किं त्वं वृष्टौ सति काम् अपि समस्याम् अनुभूतवान् अथवा दृष्टवान् ? स्व-अनुभवस्य आधारेण चित्रस्य निर्माणं कुरु।

अहो वृष्टे ! तव भव्यता, कश्चित् अस्ति प्रसन्नः, कश्चित् व्यथितः।

बालकानां वृष्टिसम्बद्धानाम् अनुभवानां श्रवणेन वृष्टिजन्येषु प्रभावेषु समीचीनेषु अथवा असमीचीनेषु द्वयोः विषये गहनतया चर्चा भवितुम् अर्हति।

नवमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
शूँड	-	शुण्डा
ओले	-	करकाः
बादल	-	मेघः
रङ्ग	-	वर्णाः
घोडा	-	तुरङ्गः
अप्पूहाथी	-	श्यामगजः

10 पचेम, खादेम

चित्रे स्थानेषु बिन्दवः (•) संलग्नाः सन्ति, तेषु वर्णान् पूरयन्तु। उद्धृय किं किम् आगतम् ?

_____ _____ _____ _____

_____ _____ _____ _____

© NCERT not to be republished

त्वं चित्रे भोजनपचनस्य अनेकानि पात्राणि अन्विष्टवान् स्याः । किं तव गृहे एतान् अतिरिच्य केषाञ्चित् अन्येषां पात्राणाम् अपि उपयोगः भवति ? केषां केषाम् ?

_____ _____ _____

_____ _____ _____

_____ _____ _____

पात्राणि कैः वस्तुभिः निर्मितानि भवन्ति ?

_____ _____ _____

स्व-ज्येष्ठेभ्यः अवगच्छतु यत् पूर्वं कीदृशानां पात्राणां बाहुल्येन उपयोगः भवति स्म । तानि केषां वस्तूनां निर्मितानि भवन्ति स्म ?

वयं खादनस्य प्रत्येकं वस्तु तु पक्त्वा न खादामः । अवगच्छ यत् वयं कानि वस्तूनि अपक्वं खादामः कानि च वस्तूनि पक्त्वा खादामः । कानि वस्तूनि पक्त्वा अपक्त्वा उभयथा खाद्यन्ते । दत्तायां तालिकायां पूरय ।

अपक्त्वा खादितव्यानि वस्तूनि	पक्त्वा खादितव्यानि वस्तूनि अपक्त्वा	पक्त्वा च खादितव्यानि वस्तूनि

त्वं कदापि रोटिकाया: निर्माणं दृष्टवान् ? एतस्य कृते कियन्ति कार्याणि करणीयानि भवन्ति – पिष्टस्य पात्रे निष्कासनम्, तस्य आपीडनम्, लघुगोलकानां निर्माणम्, गोलकस्य वेल्लनम्, तथा पुन: तस्य अग्नौ पाचनम्। एतानि सर्वाणि कार्याणि कृत्वा रोटिका स्थालिकायाम् आगच्छति।

अधुना त्वं पाकशालां गत्वा किमपि वस्तुपचनं पश्य। तत् पक्तुं किं किं कृतम् ? क्रमेण लिख। वस्तुन: नाम लेखनं न विस्मरणीयम्। स्वस्य केषाञ्चित् मित्राणां टिप्पणीपुस्तिकाम् अपि पश्य। समूहे एतस्मिन् विषये चर्चाम् अपि कुरु।

वस्तुन: नाम _____

1 _____ 2 _____ 3 _____

4 _____ 5 _____ 6 _____

त्वं दृष्टवान्, खादनस्य वस्तूनि विविधप्रकारेण पाचितानि। कस्यचित् उष्णीकृत्य तु कस्यचित् तलनं कृत्वा पाचनं भवति। कस्यचित् भर्जनं भवति, तु कस्यचित् वाष्पेण पाचनं भवति।

दत्तानां पाचनस्य उपायानां सम्मुखे वस्तुद्वयस्य नाम लिखतु, यद् तेन विधिना पाच्यते। रिक्तस्थाने काञ्चन अन्यान् उपायान् अपि योजयतु तथा तेषाम् उदाहरणानि अपि लिखतु।

पाचनस्य विधय:	वस्तूनां नामानि	
भर्जयित्वा	_____	_____
क्वथयित्वा	_____	_____
तलनं कृत्वा	_____	_____
उष्णीकृत्य	_____	_____
_____	_____	_____
_____	_____	_____

गृहस्य जनै: सह वार्तां कृत्वा बालका: स्व- ज्ञानं वर्धयन्तु, येन एतत् स्पष्टं भवेत् यत् शिक्षिकाया: अतिरिक्तम् अन्ये जना: अपि ज्ञानस्य स्रोतांसि भवन्ति।

* तव गृहे भोजनं कस्मिन् पाच्यते ? तस्य चित्रस्य टिप्पणी-पुस्तिकायां निर्माणं कुरु तथा तस्य नाम लिख ।

* अध: दत्तानि चित्राणि अभिज्ञाय तेषां नामानि लिख । एतान् ज्वालयितुं कस्य कस्य उपयोग: भवति- तेन सह तद् मेलयतु । मेलनम् एकाधिकं वस्तुभि: भवितुम् अर्हति ।





मृत्तैलम्

अङ्गार:

विद्युत्

वातचुल्लिका

आतप:

काष्ठम्

गोमयपिण्डम्



भोजनपाचनस्य पृथक् - पृथक् उपायेषु बालकानां स्वानुभवा: रुचिकरा: भवितुम् अर्हन्ति । गृहेषु उपयुज्यमानै: इन्धनै: पर्यावरणे जायमानेषु प्रभावेषु चर्चा अपि भवितुम् अर्हति ।

निर्मापयेत् खादेत् च

अखण्डितं मुद्गं जले आरात्रिं निमज्जयतु। प्रातः तान् आर्द्रवस्त्रेण आवेष्ट्य पश्चात् आवृत्य च कस्मिंश्चित् पात्रे स्थापयतु। एकस्य अथवा दिनद्वयस्य अनन्तरं तान् उद्घाट्य पश्यतु। किं तेषु भेदः दृश्यते ?

एतेषु किञ्चित् कर्तितः पलाण्डुः, रक्तवृन्ताकं, लवणं तथा जम्बीररसस्य मिश्रणं कुर्वन्तु। कक्षायां मिलित्वा विभज्य च खादन्तु।

एतादृशानि कानि कानि वस्तूनि सन्ति, यानि त्वम् अपक्वानि सज्जीकर्तुं शक्नोषि। अधः तेषां नामानि तथा तेषाम् उपायान् अपि लिख।

1. जम्बीरस्य पानकम्	जले शर्करायाः विलयनम्	→ जम्बीररसस्य निक्षेपणम्	→ विशोधनम्	→ पेयं सिद्धम्
2. ————		→	→	→
3. ————		→	→	→

बालकाः मिलित्वा खादनस्य वस्तूनां निर्माणे आनन्दम् अनुभवन्ति। ते स्वपरिवेशस्य अनुसारं केषाञ्चित् वस्तूनां निर्माणं कर्तुं शक्नुवन्ति।

दशमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः	-	संस्कृतशब्दाः
कोयला	-	अङ्गारः
गैंस	-	वातचुल्लिका
धूप	-	आतपः
उपले	-	गोमयपिण्डम्
टमाटर	-	रक्तवृन्ताकम्

11 इतस्तत्र

रेलयानम्

आगच्छन्तु बाला: क्रीडां दर्शयेम,
'छुक-छुक' इति कुर्वत् रेलयानं चालयेम।
शीच्छब्दं कृत्वा आसन्देषु उपविशन्तु।
अन्योन्यस्य पृष्ठे उपविशन्तु।
अग्रे पृष्ठे, पृष्ठे अग्रे,
पङ्क्त्या परन्तु कोऽपि न धावेत्।
सर्वे सरल-पङ्क्तौ चलन्तु,
नेत्रे निमिल्य स्थापयन्तु।
पिहितनेत्राभ्यां दर्शनं कुर्यात्,
नेत्रे चेत् उद्घटिते किञ्चित् न प्राप्नुयात्।
रेलयानम्,रेलयानम्, 'छुक-छुक-छुक-छुक,छुक-छुक-छुक-छुक' इति।
मध्ये स्थितानि रेलस्थानकानि वदन्ति, 'तिष्ठ-तिष्ठ-तिष्ठ-तिष्ठ' इति।
'तडक-भडक' इति , लौहस्य मार्ग:,
इतस्तत्र, ततोऽत्र।
'छुक-छुक, छुक-छुक' इति
आयाति विद्युत्दीप: पारं च गच्छति।
सिकता: बालुका:, आलुकस्य क्षेत्रम्,
वज्रक: धान्यम्, वृद्ध: कृषक:।
हरितं क्षेत्रम्, मन्दिरं गृहम्,
चायस्य आपण: --------

‘रेलयानम्, रेलयानम्, छुक-छुक-छुक-छुक, छुक-छुक-छुक-छुक’ इति ।
मध्ये स्थितानि रेलस्थानकानि वदन्ति, ‘तिष्ठ तिष्ठ तिष्ठ तिष्ठ’ इति ।

सेतु: चरणवीथि:, उन्नतभूमौ वैजयन्ती,
जलस्य पल्वलं पक्षिणां निबिडस्तम्ब:,
उटज:, कंटगुल्म:, कृषि-वाटिका,
मेघ: धूम:, मधुर: कूप: ।
कूपस्य पृष्ठे, उद्यानं वाटिका,
रजकस्य घट्ट:, मङ्गलवारस्य आपण: ।
ग्रामे मेला, सम्मर्द: वैषम्यम् ,
विदीर्णा भित्ति:, क्षुद्रघोटक: आरूढ: .....

रेलयानम्, रेलयानम्, ‘छुक-छुक-छुक-छुक, छुक-छुक-छुक-छुक’ इति ।
मध्ये स्थितानि रेलस्थानकानि वदन्ति, ‘तिष्ठ-तिष्ठ-तिष्ठ-तिष्ठ’ इति ।

- हरेन्द्रनाथचट्टोपाध्यायस्य कविताया: केचन अंशा:

तर्हि कथम् आसीत् एषा कविता !

* किं रेलयानं कुत्रापि चलितुं शक्नोति ? किमर्थम् ?
* एतस्यां कवितायां ‘लौहस्य मार्ग:’ क: कथित: अस्ति ?

* कवितायां रेलयानं कुत: कुत: भूत्वा गच्छति ? नामावल्या: निर्माणं कुरु ।

_____ _____ _____

_____ _____ _____

* त्वं कस्मिन् कस्मिन् वाहने उपविष्टवान् ? तेषां नामानि स्वस्य टिप्पणी-पुस्तिकायां लिख ।

आगच्छ, त्वां कैश्चित् बालकैः सह मेलयामः अवगच्छामः च यत् ते स्वस्य अवकाशदिनानि कथं यापितवन्तः । यापितवन्तःका: केषां वाहनानां नामानि उक्तवन्त: ?

अहं पितृव्यस्य पार्श्वे देहलीं गतवती आसम् । रेलस्थानकात् तेषां गृहे पूर्वं तु यानेन गच्छन्ति स्म, परन्तु एतस्मिन् पर्याये तु आनन्दः आगत आगतः ।

वयं याने उपविश्य भूम्याः अधः सुरङ्गेन भूत्वा गताः । गच्छताम् अस्माकं न प्रतीतम् एव यत् उपरि समतलभागः भवेत् इति ।



मम तु पितृभगिन्याः विवाहः आसीत् । एतावन्तः सर्वे सम्बन्धिनः मिलितवन्तः । पर्याप्तं खादितवन्तः पीतवन्तः क्रीडितवन्तः च । ज्येष्ठभ्राता अपि अमेरिका देशात् आगतवान् याने उपविश्य ।

विचारयामि तु आश्चर्यं भवति - एतावत् दूरात् आगतः परन्तु एकस्मिन् दिने एव प्राप्तवान् । वधूं पितृभगिनीं यदा नयन्ति स्म, तदा सा बहु सुन्दरी दृश्यते स्म ।

अहं स्व- मातामह्याः गृहं केरलं गतवती आसम् । सा यत्र निवसति, तस्याः समन्तात् जलम् एव जलम् अस्ति । तस्याः गृहं गन्तुं भ्रमित्वा गतवती स्यां चेत् स्थानकात् अथवा 

किञ्चित् विचित्रम् अनुभूतं परन्तु चिकरम् अपि आसीत् । स्वीकर्तुं शक्यते । परन्तु वयं साक्षात् गतवन्तः ।

वयम् अवकाशेषु शिमलां भ्रमितुं गतवन्तः । उन्नतेषु पर्वतेषु यानं यदा तिर्यक् मार्गेषु भूत्वा चलति, तदा अधः दृष्ट्वा बहु भयः उत्पद्यते स्म । शिमलायां वयं बहु पादाभ्यां चलितवन्तः मम मातामही शीघ्रम् एव श्रान्ता भवति स्म । वयम् ताम्  उपवेशयामः स्म । अहं तु आनन्देन पादाभ्यां चलामि स्म । अहं श्रान्तः अपि न भवामि स्म ।

मम मातृष्वसा मम गृहस्य पार्श्वे एव निवसति । यदा अपि मातृष्वसुः मातृष्वसायाः पार्श्वे गन्तुं मनः करोति, अहं शीघ्रम्  एव स्वकीयां स्वीकरोमि तथा तस्याः पार्श्वे प्राप्नोमि । माता अनुजः च तु  उपविश्य मातामह्याः गृहं गच्छतः ।





एतेषु अवकाशेषु अहं स्वस्य मातुलस्य ग्रामं गतवान् । तस्य ग्रामपर्यन्तं किमपि बसयानं न गच्छति । वयं सर्वे रेलस्थानकात् उपविश्य विकसितेषु क्षेत्रेषु भूत्वा ग्राम-पर्यन्तं गतवन्तः । मम वृषभाणां ग्रीवासु बद्धानां घण्टिकानां ध्वनिश्रवणं बहु सम्यक् प्रतीतम् ।

* बालकाः केषां केषां वाहनानां नामानि उक्तवन्तः ।

_____ _____ _____

_____ _____ _____

_____ _____ _____

* अधः लिखितेषु स्थानेषु स्व-गृहात् कथं गन्तुम् इच्छन्ति ? वाहनस्य नाम मञ्जूषायां लिखन्तु ।



* भवान् यात्रायाम् आत्मानं सुरक्षितं कथं स्थापयति ?

बालकाः बहूनि वाहनानि प्रत्यक्षरूपेण अथवा पुस्तकेषु चलचित्रादिषु वा दृष्टवन्तः स्युः । एते सर्वे अपि अनुभवाः बालैः सह चर्चाकरणे साहाय्यं कुर्युः । तेषां प्रसङ्गानुसारं गतिविधीन् कारयन्तु, येन ते यात्राकाले स्वस्य सुरक्षां सुनिश्चेतुं शक्नुयुः । यथा – नगरक्षेत्रस्थाः बालाः मार्गसुरक्षायाः यातायातस्य वा नियमानां विषये बोधयितुं शक्यन्ते ।

केषाञ्चित् वाहनानां चित्राणि निर्मितानि सन्ति। चित्रस्य समक्षं तेषां नामानि लिखन्तु तथा ते कस्मिन् कार्ये प्रयुक्ता: भवन्ति इति अपि लिखन्तु। रिक्तेषु स्थानेषु अन्येषां वाहनानां चित्राणि अपि निर्मान्तु। कार्ये आगच्छन्ति ?

वाहनानि	कार्याणि
	_____
	_____
	_____
	_____
	_____
	_____
	_____
	_____

वाहनानि	कार्याणि
	_____
	_____
	_____
	_____
	_____
	_____
	_____
	_____

© NCERT not to be republished

अध: दत्ते चित्रे केषाञ्चित् वाहनानां नामानि लिखितानि सन्ति। त्वया प्रत्येकं वाहनं एकस्मिन् भागे तस्य चक्रस्य संख्यया सह संयोजनीयम् अस्ति। अपरस्मिन् भागे तम् एव वाहनं तत् येन चलति, तेन संयोजनीयम् अस्ति।



not to be republished



ज्येष्ठान् पृष्ट्वा जानन्तु- अद्यारभ्य पञ्चाशतः वर्षेभ्यः पूर्वं जनाः कथं गमनागमनं कुर्वन्ति स्म ? किं तदा अपि एतानि सर्वाणि साधनानि आसन् ?

किं त्वम् अनुमानं कर्तुं शक्नोषि यत् विंशतिवर्षाणाम् अनन्तरं जनाः गमनागमनस्य कृते कीदृशानां वाहनानां प्रयोगं करिष्यन्ति ? स्वगृहस्य जनान् मित्राणि च पृष्ट्वा दत्तां तालिकां पूरय ।

कस्मात् पृष्टवान्	किं कथितम्
स्वं पृष्टवान् (अहम्)	
मित्राणि	
पितृव्यम्	
शिक्षिकाम्	

ज्येष्ठेभ्यः प्राप्त-ज्ञानाधारिता चर्चा बालकानां वाहनेषु आगतानि परिवर्तनानि अवगन्तुं साहाय्यं करिष्यति । पुस्तकेषु ज्येष्ठाः – मातामहः मातामही, पितामहः पितामही च एतदर्थं वारं-वारं प्रष्टुं कथिताः सन्ति येन बालकाःतदानीन्तन-अद्यतनकालयोः मध्ये भेदम् अवगच्छेयुः ।

तव स्वकीयं रेलयानम्

दत्तस्य चित्रस्य साहाय्येन अग्निपेटिकायाः पेटिकाभिः रेलयानस्य निर्माणं करोतु।

यदि कश्चित् 'छुक-छुक' इति ध्वनिं करोति तर्हि त्वं शीघ्रम् एव जानासि यत् सः रेलयानस्य कृते कथयन् अस्ति।

किं त्वम् एताभिः ध्वनिभिः वाहनं परिचिनोषि ? लिख।

'छुक-छुक' - रेलयानम्

'पीं - पीं' - _____

'पौं - पौं' - _____

'टप - टप' - _____

'घर्र - घर्र' - _____

'ट्रिन - ट्रिन - _____

* एषः तु आसीत् एकैकस्य वाहनस्य ध्वनिः। यदा मार्गे सार्धम् अनेकानि वाहनानि ध्वनीन् कुर्वती चलन्ति, तदा कथं प्रतीयते। भवति खलु कियान् कोलाहलः !
* त्वं सर्वाधिकं कोलाहलं कुत्र श्रुतवान् अस्ति ?
* किं तुभ्यम् एतावान् कोलाहलः रोचते ? किमर्थम् ?

रेलयानस्य अभिरूपनिर्माणाय अग्निपेटिकाम् अतिरिच्य टीन इत्यस्य मञ्जूषाः अपि उपयोगे आनेतुं शक्यन्ते अपि च चक्रः कूप्याः शरावेण कुड्मलेन वा निर्मापयितुं शक्यते।

* चित्रे त्वया किं किं दृश्यते ?

* त्वया कानि कानि यानानि दृश्यन्ते ।

* एतानि यानानि किं कार्याणि कुर्वन्ति सन्ति ?

चित्राणां साहाय्येन आपत्कालस्थितीनां विषये चर्चायाः आरम्भः कर्तुं शक्यते ।

उपरितनीः मञ्जूषाः दृष्ट्वा अधः तासां क्रमेण निर्माणं कुर्वन्तु वर्णं च पूरयन्तु । पश्यन्तु किं निर्मितं भवति । तस्य नाम अपि लिखन्तु ।



1	2	3	4
5	6	7	8
9	10	11	12

© NCERT not to be republished

एकादशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
बालू	-	सिकताः
बाजरा	-	वज्रकः
पुल	-	सेतुः
पगडंडी	-	चरणवीथिः
झूण्ड	-	निबीडस्तम्बः
झाडी	-	कण्टकगुल्मः
धूमः	-	धुवाँ
झोंपड़ी	-	उटजः
भीड़	-	सम्मर्दः
खाला	-	मातृष्वसा

12 कार्याणि स्वकीयानि स्वकीयानि



प्रतिदिनम् इव बलबीरः अल्पाहारं कृत्वा चायस्य आपणं प्राप्तवान्। अद्य तेन सह ग्रामात् आगतः तस्य भ्राता सतविंदरः अपि आसीत्। चायस्य आपणिकः चायं यच्छन् उक्तवान् - स्वीकरोतु, समाचारपत्रम् अपि पठतु।

भवान् अत्र आदिनं समयस्य कथं यापनं करोति ? 'आदिनम् उपविश्य मनसि जामिता न भवति वा ?' इति सतविंदरः पृष्टवान्।

अरे ! समय: तु एवमेव व्यतीत: भवति, ज्ञानम् अपि न भवति ! तत्र पश्यतु, बालकानां प्रत्येकं दिनम् इव विद्यालयप्राप्तौ विलम्ब: अभवत्। धावन्ति सर्वे ! सा महोदया अपि अद्य विलम्बेन आगतवती अस्ति। अरे ! एवं प्रतीयते, तस्या: पादरक्षा त्रुटिता जाता। अधुना सा जगमोहन-भ्रातु: पार्श्वे पादरक्षां सम्यक् कारयितुं गच्छति। सम्यक् अस्ति, जगमोहन: प्रात:काले धनम् अर्जितवान्।

पाठस्य पठनात् पूर्वं यदि बालकेभ्यः अवधानेन चित्रं द्रष्टुम् अवगन्तुं च अवसर: दीयेत तर्हि तेषु चित्र-अवलोकनस्य कौशलस्य विकास: भविष्यति।

तत्र चम्पा उपविष्टा अस्ति, स्वस्य पुष्पाणां कण्डोलं सज्जीकृत्य । पत्रालयस्य कार्यकर्त्री महोदया प्रतिदिनं प्रात: तस्या: पुष्पाणि क्रीणाति ।

ट्रकयाने सामग्री आयाति । भवनस्य कार्यस्य पुन: आरब्धःअस्ति । कर्मकरा: पुन: आदिनं कार्ये संलग्ना: भविष्यन्ति ।

तत्र चिकित्सालयं प्रति पश्यतु , चिकित्सक: तथा उपचारिका सार्धम् आगच्छत: ।

तं रामदासं पश्यतु, फलानां हस्तशकटेन सह । अद्यत्वे स: चिनम्माम् अपि आत्मना सह कार्ये आनयति । चिनम्मा धावित्वा फलानि प्राप्नोति, धनम् एकत्रीकरोति ।

तत्र श्याम: नापित: स्व-आपणम् उद्घाट्य क्षौरकार्यस्य कृते सिद्ध: उपविष्ट: अस्ति - परन्तु कस्य कुर्यात् ?

चतुष्पथस्य मध्ये स्थित: अस्ति इकबालसिंह:, य: आदिनं सिटिकां रावयति । पी ई ई ..... अरे ! यानम् इत: निष्कासयतु .....किं न श्रुतवान् ..... हस्तशकट: अत्र ..... ।

एतावत् उक्त्वा बलबीर: चायस्य लघुचषकं स्थापितवान् तथा चलितवान् निकटस्थम् आपणं प्रति ।

अभिनयं कृत्वा दर्शयतु – कस्मिन् चतुष्पथे, आपणे जना: किं किं कुर्वन्ति ।

* अधुना अवधानेन चित्रं दृष्ट्वा लिखतु यत् कानि कानि कार्याणि भवन्ति ।

_____ _____

_____ _____

_____ _____

_____ _____

* तव गृहस्य समीपे जायमानानि कानिचन पञ्चकार्याणि लिख । एतान् कार्यकर्तॄन् किं कथयन्ति । तेषां कार्यस्य सम्मुखे लिख ।

कार्याणि	किं कथ्यन्ते
स्कूटरयानं कारयानं वा सम्यक् करणम्	यान्त्रिका:

पूर्वस्मिन् चित्रे कानिचन भवनानि दर्शितानि सन्ति । अत्र तेषां भवनानां नामसु रक्तवर्णेन ◯ निर्मातु । अधुना भवतः परिवेशे यानि भवनानि सन्ति तेषु हरितवर्णेन अन्येन केनापि वर्णेन वा ◯ निर्मातु ।

पत्रालय:	चिकित्सालय:	मन्दिरम्
दूरवाणी गृहम्	विद्यालय:	महाविद्यालय:
सर्वकारीयः कार्यालय:	गिरिजागृहम्	बहुभूमिकानि भवनानि
मस्जिद्	पांथशाला	लोकयान-स्थानकम्
चलचित्रशाला	आरक्षालय:	वित्तकोश:
प्रस्तर-तैलगृहम्	आपण:	गुरुद्वारम्
धर्मशाला	रेलस्थानकम्	धर्मन्याय-सभा

* केषाञ्चित् पञ्चानां भवनानां नामानि लिख तथा तेषु कानि कार्याणि भवन्ति, इति अपि लिख।

भवनस्य नाम	किं किं कार्यं भवति
चिकित्सालय:	रुग्णानाम् उपचार:,बालकानां रोगद्रव्यनिवेशनम्

त्वं चित्रे दृष्टवान् यत् नूतनं भवनं निर्मातुं बहव: जना: युगपत् कार्यं कुर्वन्ति।

* विद्यालय: अपि एतादृशं स्थानम् अस्ति,यत्र अनेके जना: कार्यं कुर्वन्ति। लिख, विद्यालये कानि कानि कार्याणि भवन्ति।

* किं चित्रे एतादृशा: अपि बालका: सन्ति, ये विद्यालयं न गच्छन्ति ? ते किं कुर्वन्ति ?

गृहस्य कार्यम्

दीपाली अपि एतादृशी एव एका बालिका अस्ति या विद्यालयं न गच्छति। आगच्छ, तस्या: विषये जानीम:। दीपाली स्वभ्राता-भगिनीषु ज्येष्ठा अस्ति। तस्या: पिता शाकस्य आपणं करोति।

सः प्रातः चतुर्वादने एव महाहट्टं गच्छति। तस्याः माता जनानां गृहेषु पात्राणि मार्जयति। सा अपि प्रातः शीघ्रम् एव गृहात् निर्गच्छति। दीपाली स्व-भ्राता-भगिनीनां कृते भोजनं निर्माति। गृहस्य स्वच्छतया सह सा पात्राणि अपि मार्जयति। आकाशवाण्याः श्रवणं तस्यै बहु रोचते। कार्यं कुर्वती सा गीतानि अपि शृणोति। कार्यं समाप्य सा स्व-अनुजं भ्रातरं राजुं पितुः हस्तशकटे उपावेशयति। पुनः स्व-अनुजे भगिन्यौ सुमतिं शीलां च विद्यालयं नयति।

एतदनन्तरं दीपाली स्व मात्रा सह कार्ये साहाय्यं करोति। मध्याह्ने सा स्व-भ्रातृ-भगिन्यौ गृहम् आनयति। सायं काले सा सर्वैः बालकैः सह वीथ्यां क्रीडति। सायं समाप्तिः अनन्तरं तस्याः माता गृहम् आगच्छति। दीपालीभोजनपाचने मातुः साहाय्यं करोति। तस्याः पिता रात्रौ विलम्बेन एव गृहं प्राप्नोति।

दीपाली रात्रौ शय्यायां संविश्य स्व-भगिन्योः विद्यालयस्य पुस्तकानि पठति। सा अपि तु तृतीयकक्षां यावत् पठितवती। त्रीणि वर्षाणि पूर्वं यदा तस्याः लघु भ्राता जनिं लब्धवान्, तदा आरभ्य दीपाली तस्य अवधानाय गृहे स्थिता भवति। सा पुनः अग्रे न पठितुं शक्तवती। दीपाल्याः प्रतीयते यत् पुस्तकानि पठनेन तस्याः आदिनस्य श्रान्तिः दूरीभवति। कदाचित् अद्य अपि यदि सा अवसरं प्राप्नुयात्, तर्हि सा विद्यालयं गन्तुम् ऐषिष्यत्।

* दीपाली स्व-गृहस्य कानि कानि कार्याणि करोति ?

_____ _____ _____

_____ _____ _____

* किं त्वम् अपि स्व-गृहस्य कार्याणि करोषि ? यदि आम्, तर्हि कानि कानि ?

_____ _____ _____

_____ _____ _____

* किं त्वं गृहस्य कार्यस्य अतिरिक्तं किमपि अन्यं कार्यं अपि करोषि ? किं तत् ?

_____

_____

अधः कानिचित् कार्याणि लिखितानि सन्ति कस्मिन् समये करोषि घट्यां दर्शय।

प्रातः उत्तिष्ठति ?

विद्यालयं गच्छति ?

विद्यालयात् आगच्छति ?

गृहे पठितुम् उपविशति ?

क्रीडितुं गच्छति ?

रात्रौ शयनं करोति ?

© NCERT not to be republished

* तव कुटुम्बस्य के के जना: गृहस्य कार्याणि कुर्वन्ति ? ते कानि कानि कार्याणि कुर्वन्ति ? तालिकायां पूरयत।

कुटुम्बस्य जना:	कानि कानि कार्याणि कुर्वन्ति

* तव कुटुम्बस्य के के जना: धनम् अर्जयितुं कार्याणि कुर्वन्ति ?

कुटुम्बस्य जना:	किं किं कार्यं कुर्वन्ति।

तव कुटुम्बे के के जना: एतादृशा: सन्ति ये कार्यं कुर्वन्ति परन्तु ते धनं न प्राप्नुवन्ति ?

वार्तालापसमये एष: सन्देश: अवश्यं मिलेत् यत् सर्वाणि अपि कार्याणि महत्त्वपूर्णानि सन्ति – किमपि कार्यं श्रेष्ठम् अश्रेष्ठं वा न भवति। यदि बालकै: उक्तेषु कार्येषु लिङ्गवैषम्यं दृश्येत तर्हि तेषां कारणेषु चर्चाकरणं सम्यक् भविष्यति।

अवगच्छतु – तव गृहस्य ज्येष्ठजना: (पितामह: - पितामही, मातामह: - मातामही) यदा बालका: आसन्, तदा ते कानि कानि कार्याणि कुर्वन्ति स्म ?

_____ _____ _____

_____ _____ _____

साराम्मा गृहं गत्वा स्व-मातामहीम् एतम् एव प्रश्नं पृष्टवती । मातामही उक्तवती यत् सा बाल्यकाले काष्ठानाम् एकत्रीकरणम्, गोमयम् एकत्रीकृत्य तस्य गोमयपिण्डानां निर्माणं, कदाचित् गोमयेन गृहस्य लेपनम् इति एतादृशेषु कार्येषु ज्येष्ठानां साहाय्यं करोमि स्म । परन्तु अधुना तु गृहे गोमयवायो: चुल्लिका अस्ति । अश्मचूर्णस्य भित्तय: तथा कुट्टिम: अस्ति । साराम्मा अधुना स्व-गृहस्य अनेकानि एतादृशानि कार्याणि न करोति यानि तस्या: मातामही स्वीयबाल्यकाले करोति स्म ।

त्वं पूर्वं लिखितवान् यत् त्वं किं कार्यं करोषि इति तथा तव गृहस्य ज्येष्ठजना: स्वकीय-बाल्यकाले कानि कार्याणि कुर्वन्ति स्म । एतानि कार्याणि समानानि सन्ति अथवा पृथक् पृथक् ?

दीपाली गृहे कार्यं कर्तुं विद्यालयं त्यक्तवती । अवगच्छतु किं तव गृहस्य समन्तात् पञ्चवर्षेभ्य: अधिकाया: आयुषः बालका: निवसन्ति, ये विद्यालयं न गच्छन्ति ।

एतादृशाभ्यां बालाभ्यां सह चर्चां कृत्वा लिख, तौ विद्यालयं किमर्थं न गच्छत: ?

प्रथम-बालकस्य नाम _____

विद्यालये अगमनस्य कारणम् _____

द्वितीय-बालकस्य नाम _____

विद्यालये अगमनस्य कारणम् _____

द्वादशमपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
ठेला	-	हस्तशकटः
डाकघर	-	पत्रालयः
टेलीफोनबूँथ	-	दूरभाषागृहम्
बहुमंजिला मकान	-	बहुभूमिकानि भवनानि
गिरिज़ाघर	-	गिरिजागृहम्
फर्श	-	कुट्टिमः
पुलिस थाना	-	आरक्षालयः
बैंक	-	वित्तकोषः
दुकान	-	आपणः
रेलवे स्टेशन	-	रेलस्थानकम्
कचहरी	-	धर्मन्याय-सभा
सीमेंट	-	अस्मचूर्णः

13 स्पृष्ट्वा पश्येत्

अहं विद्यालयात् प्रत्यागच्छन्ती आसम् । गृहे जनद्वयं स्वकीयां वार्तां सर्वप्रथमं वक्तुम् इच्छामि स्म । तौ मम वार्ताभिः सर्वाधिकं प्रसन्नौ भवतः ।

प्रथमा तु अस्ति मम मातामही । सा उत्सुका भवति मम वार्तां श्रोतुम् । सा मम विद्यालयात् प्रत्यागमनस्य प्रतीक्षां करोति । तस्याः आयुः किञ्चित् अधिकम् अस्ति तस्याः कट्यां पीडा चाऽपि भवति । मातामही उच्चस्वरेण शृणोति दृष्टिः चाऽपि मन्दा अस्ति । प्रतिदिनं प्रातः पिता ताम् उच्चस्वरेण समाचारपत्रं पठित्वा श्रावयति । मातामही अवशिष्टं सर्वं स्वकीयं कार्यं स्वयम् एव करोति । तस्याः कश्चित् साहाय्यं करोति चेत् सा व्यथिता भवति । सा बहु मन्दं पश्यति परन्तु शाककर्तने बहु अभिरुचिः अस्ति तस्याः ।

कथयति - अद्यतनीयाः बालकाः शाककर्तनम् अपि न जानन्ति । स्थूलं तिर्यक् च कर्तयित्वा स्थापयन्ति ।

द्वितीयम् अस्ति, मम भ्राता रविः । भ्राता रविः अस्माकं गृहे एव निवसति । अहं तं रविभ्राता कथयामि तथा सः मम मातरं पितरं कथयति - भ्राता भ्रातृजाया च । आवयोः कः सम्बन्धः अस्ति, अहं न जानामि परन्तु सः मम प्रियः भ्राता अस्ति । सः मम प्रश्नानाम् उत्तरं दातुं सर्वदा सिद्धः भवति । सः कदापि न उक्तवान् - पश्चात् वदिष्यामि ।

भ्राता रविः महाविद्यालये पाठयति । महाविद्यालयस्य छात्राः तस्य बहु सम्मानं कुर्वन्ति । केचन तु तस्मात् पठितुं गृहम् अपि आगच्छन्ति । भ्रातुः रवेः संगीत-श्रवणे, नाटकेषु भागग्रहणे, मित्रैः सह भ्रमणे तथा वार्ताकरणे बहु अभिरुचिः अस्ति । बहु हसति हासयति अपि सः ।

भ्राता यदा गृहात् बहि निर्गच्छति, तदा एकां श्वेत-यष्टिं नयति । तं गृहस्य

अन्तः अटन्तं दृष्ट्वा कश्चित् अपि न कथयितुं शक्नोति यत् सः द्रष्टुं न शक्नोति। सः स्वकीयं कार्यं स्वयमेव कर्तुम् इच्छति। कोऽपि यदि बलात् तस्य साहाय्यं करोति तर्हि सः रुष्टः भवति। यदा कदाचित् तं सहायतायाः आवश्यकता भवति तर्हि सः याचते।

केचन बालकाः रविभ्रातुः महाविद्यालयस्य पुस्तकानि स्वीकुर्वन्ति तथा केषाञ्चित् दिनानाम् अनन्तरं पुस्तकैः सह तस्मै टेपयन्त्रं यच्छन्ति। रविभ्राता टेपयन्त्रे एव तानि पुस्तकानि शृणोति। भ्रातुः पार्श्वे स्थूलस्य कर्गदस्य अपि अनेकानि पुस्तकानि सन्ति, येषु अनेके उद्गताः बिन्दवः सन्ति। तेषु सः हस्तेन स्पर्शं कृत्वा पठति।

भ्रातरं पीडयितुम् अहं कदाचित् तस्य यष्टेः स्थानम् अपि परिवर्तयामि। सः दुखितः तु भवति, परन्तु रुष्टः न भवति। यतो हि अहं तस्य प्रिया भगिनी अस्मि।

अधुना अहं द्वारं प्राप्तवती एव आसं यत् भ्राता उक्तवान् - किमर्थं सीमे !, बहु प्रसन्ना असि ?

भ्राता माम् एव न, गृहस्य सर्वान् जनान् तेषां पदरवैः परिचिनोति। अहं प्रसन्ना अस्मि खिन्ना वा इति अपि सः ऊहते।

भ्रातः ! अन्ततोगत्वा अहं पादकन्दुक-क्रीडायाः समूहे सम्मिलितः अभवम् - अहं भ्रातरं स्वकीयं समाचारं श्रावितवती। भ्राता मम प्रोत्साहनं कृत्वा उक्तवान् - अद्यारभ्य त्वम् एव असि मम पादकन्दुकस्य गुरुः !

* सीमायाः पिता तस्याः मातामहीम् उच्चस्वरेण समाचारपत्रं पठित्वा श्रावयति। त्वं वृद्धानां जनानां कथं साहाय्यं करोषि ?

_____

* यदा कश्चित् जनः वृद्धः भवति, तदा तस्य किं किं कष्टं भवितुं शक्नोति ?

_____

* रविभ्राता अदृष्ट्वा अनेकाः वार्ताः कथं जानाति ?

_____

कथासु बालकानां रुचिः भवति। तथा कथायाः पात्राणां साहाय्येन संवेदनशीलताम् उत्पादयितुं शक्यते।

* किं तव कदाचित् यष्टेः आवश्यकता अभूत् ? कदा ?

_____

* किं त्वं विचारयितुं शक्नोषि ? तव यष्टेः आवश्यकता कदा भविष्यति ?

_____

* वयं तेषां जनानां साहाय्यं कथं कर्तुं शक्नुमः, ये द्रष्टुं न शक्नुवन्ति ?

_____

_____

किं तव कुटुम्बे कोऽपि एतादृशः जनः अस्ति, यः द्रष्टुं, वक्तुम् अथवा श्रोतुं न शक्नोति ? किं त्वम् एतादृशं कमपि जनं जानासि ? एतेषां कार्येषु जनाः कथं साहाय्यं कर्तुं शक्नुवन्ति ?

यूयं कथायां पठितवन्तः यत् रविभ्राता द्रष्टुं न शक्नोति । परन्तु सः स्वकीयानि सर्वाणि कार्याणि स्वयम् एव कर्तुं शक्नोति । सः भिन्नप्रकारस्य पुस्तकानि पठति । सः कथं स्वकीयं कार्यं कुर्वन् स्यात् - इदम् अवगन्तुं प्रथमं नेत्रे निमील्य अभिज्ञानस्य क्रीडां क्रीड ।

अक्षिमेषणी क्रीडा

समूहे एकः बालकः स्व - नेत्रयोः पट्टिकां बध्नातु । तदा अन्ये बालकाः एकैकं कृत्वा तूष्णीं भूत्वा तस्य बालकस्य पार्श्वे आगच्छन्तु । नेत्रनिमीलनं कृतवान् बालकः अपरस्मिन् द्वितीयबालकस्य उपरि हस्तं भ्रामयित्वा तम् अभिज्ञातुं प्रयत्नं कुर्यात् । अवध्यातव्यं यत् कश्चित् अपि ध्वनिं न कुर्यात् इति । किमर्थम् ?

अनेन प्रकारेण एव क्रमेण सर्वेषां बालकानां नेत्रेषु पट्टिकां बध्नन्तु येन ते अन्यान् बालकान् अभिज्ञातुं प्रयत्नं कुर्युः ।

आत्मानम् अन्यस्यां कस्याश्चित् परिस्थितौ स्थापनेन वयं तेषां समस्याः सम्यक्तया अवगन्तुं शक्नुमः ।

अधुना परस्परं वार्तां कुर्वन्तु तथा वदन्तु च -

- कति बालका: स्पृष्ट्वा कञ्चित् अपि अभिज्ञातवन्त: ?
- कति बालका: ध्वनिं श्रुत्वा बालकान् अभिज्ञातवन्त: ?
- द्वयो: उपाययो: क: सरलतम: आसीत् ?

* स्पृष्ट्वा वद तव मुखे कति दन्ता: सन्ति । कक्षायां केषां बालकानां सर्वाधिका: दन्ता: सन्ति ?
* कानि कानि वस्तूनि त्वं केवलं स्पृष्ट्वा ज्ञातुं शक्नोषि ?
* नेत्रे निमील्य उपविश शृणु च । कस्य कस्य ध्वनय: श्रूयन्ते ? केषां जनानां पदरवम् अभिज्ञातुं शक्नोषि ।
* केवलम् आघ्राणनं कृत्वा किं त्वं कम् अपि जनम् अथवा कम् अपि जन्तुम् अभिज्ञातुं शक्नोषि ?

ये जना: द्रष्टुं न शक्नुवन्ति तेषां पठनस्य एक: मुख्य: विधि: अस्ति, य: 'ब्रेल' इति विधि: कथ्यते । 'ब्रेल' इति एकस्मिन् स्थूले कागदे एकेन तीक्ष्णाग्रेण उपकरणेन बिन्दुं निर्माय लिख्यते । 'ब्रेल' इति कागदे हस्तं भ्रामयित्वा पठ्यते यत् तस्मिन् किं लिखितम् अस्ति ।

आगच्छन्तु, अधुना इदं पश्याम: यत् अदृष्ट्वा कस्याः अपि आकृतेः अभिज्ञानं कठिनम् अस्ति अथवा सरलम् ।

एकं 'रेगमाल' इत्यस्य कागदं स्वीकरोतु । तस्मिन् स्थूलम् ऊर्णम् अथवा 'सुतली' इति संश्लिष्य कस्यचित् वस्तुन: आकृतेः निर्माणं करोतु । स्वकीयं मित्रं वदतु यत् स: नेत्रे निमील्य, हस्तं भ्रामयित्वा वदेत् यत् भवान् कम् आकारं रचितवान् ।

* स्वकीयं मित्रम् एतादृशे एव 'रेगमाल' इत्यस्य कागदे कम् अपि आकारं निर्मातुं कथयतु ।
* किम् एतत् अभिज्ञातुं तस्य सरलम् आसीत् अथवा कठिनम् ?

अधुना त्वं कृत्वा पश्य यत् किं त्वं हस्तं भ्रामयित्वा आकारम् अभिज्ञातुं शक्तवान् ।

एकस्य स्थूलकागदस्य खण्डं स्वीकरोतु । तस्मिन् एकेन प्रकारेण अथवा कीलस्य अग्रभागेन कामपि विशिष्टाम् आकृतिं रचयन् किञ्चित् किञ्चित् दूरे छिद्राणि करोतु । त्वं द्रक्ष्यसि यत् कागदम् एकस्मात् पक्षात् उद्गतम् अस्ति । अधुना स्वमित्रं कथयतु यत् स: नेत्रे निमील्य तव

कागदे हस्तं भ्रामयित्वा वदेत् यत् त्वं किं रचितवान् इति। एतत् कथनं कठिनम् अस्ति न वा ? विचारय यत् जना: अदृष्ट्वा कथम् एतावत् पठन्ति।

आगच्छन्तु 'ब्रेल' इत्यस्य विषये जानीम:

त्वं दृष्टवान् यत् रविभ्राता एकं विशिष्ट-प्रकारस्य पुस्तकम् एव पठितुं शक्नोति। एतानि पुस्तकानि कथं निर्मितानि ? एतस्मिन् विषये सर्वप्रथमं क: विचारितवान् स्यात् ?

आगच्छन्तु, 'ब्रेल' इत्यस्य विषये किञ्चित् जानीयाम ।



लुई ब्रेल' इति फ्रांसदेशस्य निवासी आसीत्। यदा स: त्रिवर्षीय: आसीत्, तदा एकस्मिन् दिने स्व-पितु: उपकरणै: क्रीडन् आसीत्। सहसा एकेन तीक्ष्णाग्रेण उपकरणेन तस्य नेत्रयो: आघात: अभवत् तथा नेत्रे भ्रष्टे जाते। तस्य नेत्रयोः दृष्टिः पूर्णतया गता। तस्य पठने महती रुचि: आसीत्। स: पराजयं न स्वीकृतवान्। स: पठनस्य कृते भिन्नान् भिन्नान् उपायान् विचारयति स्म। अंततो गत्वा स: अन्वेषणं कृतवान् एकम् उपायम् - स्पृष्ट्वा पठनस्य। एष: विधि: अनन्तरं 'ब्रेललिपि:' इति नाम्ना प्रसिद्धा जाता।

एतस्मिन् विधौ स्थूले कागदे उद्गताः बिन्दव: निर्मिता: भवन्ति। उद्गताः सन्ति इति कारणेन स्पृष्ट्वा पठितुं शक्यन्ते। एषा लिपि: षड्-बिन्दुषु आश्रिता भवति।

अद्यत्वे 'ब्रेल' इति एतस्यां लिप्यां नूतनानि नूतनानि परिवर्तनानि जातानि, येन एतस्या: पठनं लेखनं च इतोऽपि सरलम् अभवत्। ब्रेललिपि: अधुना सङ्गणक-माध्यमेन अपि लेखितुं शक्यते।

यदि बालका: ब्रेललिपिं द्रक्ष्यन्ति तर्हि सम्यक् रीत्या अवगमिष्यन्ति। ब्रेललिपे: बोधनसमये बालकानां वास्तविक-ब्रेलकागदस्य दर्शनं सम्यक् भवेत्।

त्रयोदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कतशब्दाः
नानी	-	मातामही
ऊन	-	ऊर्णम्
छड़ी	-	यष्टिः
फूटबाँल	-	पादकन्दुकक्रीडा
आँख मिचौनी	-	नेत्रनिमेषोन्मेषक्रीडा

14 कुतः आगतवान्, कः पक्ववान्

वेणोः कुटुम्बः

रागिन्याः कुटुम्बः

द्वयोः कुटुम्बयोः कः कथं कार्यं करोति ?

* किं तव कुटुम्बः एतयोः द्वयोः कुटुम्बयोः केनचित् एकेन कुटुम्बेन सदृशः अस्ति ? यदि आम्, तर्हि कतरेण ? तव कुटुम्बेन सह तस्य कुटुम्बस्य सामञ्जस्यम् अस्ति न वा ?

रुढिबद्धासु धारणासु यथा बालक-बालिकयोः भेददृष्टिः (लिङ्ग-वैषम्यम्) इत्यस्मिन् विषये संवेदनशीलतया चर्चा भवेत् येन बालकाः प्रश्नान् कर्तुं तु शक्नुयुः परञ्च कस्याश्चित् भावनाः अपि आहताः न भवेयुः ।

* नास्ति इति चेत् स्व-कुटुम्बस्य विषये वद।
* तव गृहे सर्वे सहैव भोजनं खादन्ति न वा ? न इति चेत् किमर्थम् ?

_____

_____

* सर्वस्मात् अन्ते कः भोजनं करोति ?

_____

* अन्तिमे भोजनं कः करोति ?

_____

_____

* तव गृहे तव एकस्य मित्रस्य गृहे च तालिकायां दत्तानि कार्याणि कः करोति – अवगच्छ लिख च। कानिचन अन्यानि अपि कार्याणि तालिकायां योजय।

कार्याणि	कः करोति	
	तव गृहे	तव मित्राणां गृहे
1. भोजनस्य निर्माणम्	_____	_____
2. आपणात् वस्तूनां क्रयणम्	_____	_____
3. सम्मार्जनम्	_____	_____
4. पात्राणां सम्मार्जनम्	_____	_____
5. जलस्य पूरणम्	_____	_____
6._____	_____	_____
7._____	_____	_____
8._____	_____	_____

* गृहे अधिकं कार्यं क: करोति ?

तव गृहे _____

तव मित्राणां गृहे _____

यत् खादितं कुत: आगतम् ?

अध: कानिचन खादनस्य पानस्य च वस्तूनां नामानि लिखितानि सन्ति । यानि वस्तूनि वयं वृक्ष-पादपेभ्य: स्वीकुर्म: तेषु हरित-वर्णेन ◯ इति योजय । यानि वस्तूनि वयं जन्तुभ्य: प्राप्नुम: तेषु रक्तवर्णेन ◯ इति योजय । रिक्तस्थाने कानिचन नामानि अपि योजय ।

मधु	हरिद्रा	मीन:	_____
कणिशम्	दुग्धम्	जम्बीरम्	_____
पालङ्क:	आलूकम्	शूलहन्त्री	_____
अण्डम्	मांसम्	कदलीफलम्	_____
रक्तवृन्ताकम्	पलाण्डु:	_____	_____

यदा त्वं रुग्ण: भवसि, तदा किं वृक्ष-पादपेभ्य: प्राप्तानि वस्तूनि औषधरूपेण स्वीकरोषि ? कदा कतमं वस्तु स्वीकरोषि –

- आघाते सति _____
- उदरपीडायां सत्याम् _____

बालकानां परिवेशे औषधस्य रूपे प्रयुज्यमानानां वृक्ष-पादपानाम् अभिज्ञानं तथा तेषाम् उपयोग: पारम्परिक-ज्ञानस्य निरीक्षणस्य अवगमनस्य च अवसर: दास्यति ।

- कासस्य कृते _____
- दन्ते पीडायां सत्याम् _____

प्रत्येकं वस्तुनः कृते उचितं कण्डोलं स्वीकरोतु। पङ्क्तिं निर्माय मेलनं करोतु।

एतस्मिन् अभ्यासे केषाञ्चित् पादपानां एतादृशाः भागाः दत्ताः सन्ति, ये अस्माकं भोजनस्य भागाः सन्ति। वार्तालापेन एषा सूची वर्धयितुं शक्यते।

चतुर्दशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
कचनार के फूल	-	काञ्चनालपुष्पाणि
कटहल	-	पनसम्
पालक	-	पालङ्कः
कमल ककडी	-	कमल-कर्कडी
गोभी	-	पुष्पशाकम्
अजवाइन	-	शूलहन्त्री
टमाटर	-	रक्तवृन्ताकम्
प्याज	-	पलाण्डुः

15 आगच्छन्तु निर्मायाम पात्राणि

एका आसीत् चटका, नाम आसीत् तस्या: 'फुदगुदी' इति । एक: आसीत् काक:, नाम आसीत् तस्य भनातेः । उभयो: प्रगाढ-मित्रता आसीत्। एकस्मिन् दिने 'भनातेः उक्तवान् – अरे ! फुदगुदि ! यदि प्रथमं त्वम् अण्डानि जनयिष्यसि तर्हि अहं खादिष्यामि तथा यदि अहं प्रथमं जनयिष्यामि तर्हि त्वं खादे:। अङ्गीकरोषि ?

'फुदगुदी' अवदत् –अङ्गीकरोमि।

केषाञ्चिद्-दिनानाम् अनन्तरम् जनितवती।

'फुदगुदी' अण्डम्

चित्रग्रीव: अवदत् - देहि देहि अण्डम्, खादानि अण्डम्, देहि देहि, देहि देहि, देहि देहि।

'फुदगुदी' इति भयभीता जाता। उक्तवती - सम्यक् अस्ति भ्राता परन्तु प्रथमं स्व-चञ्चुं प्रक्षाल्य आगच्छतु नद्याम्।

भनातेः गतवान् नद्या: तटम्। उक्तवान् - हे नदि ! नदी उक्तवती– किम् अस्ति भ्राता भनातेः ?

चित्रग्रीव: अवदत् – नदि ! नदि ! जलं देहि।

शीतलं जलम्, आनेष्यामि,
चञ्चुं प्रक्षाल्य आगमिष्यामि,
तदा अहम् अण्डं खादिष्यामि।

नदी अवदत् - जलं पूरयिष्यति कथम् ? कुल्हरिकां तु आनय।

चित्रग्रीव: गतवान् कुम्भकारस्य पार्श्वे। स: अवदत् अरे ! कुम्भकार !

कुम्भकार: उक्तवान् - किं भ्राता भनातेः ?
भनातेः उक्तवान् - मह्यम् एकं कुल्हरिकां ददातु।

कुल्हरिकां स्वीकृत्य गमिष्यामि,
शीतलं जलम् आनेष्यामि,
चञ्चुं प्रक्षाल्य आगमिष्यामि,
तदा अहम् अण्डं खादिष्यामि।

कुम्भकार: उक्तवान्–कुल्हरिकाया: निर्माणं कथम् अभूत् ? प्रथमम् आनय मृत्तिकां खननक्षेत्रात्।
चित्रग्रीव: गतवान् मृत्तिकाया: खननक्षेत्रम्।
उक्तवान् - अरे ! मृत्तिकाया: आकरे !
मृत्तिकायाः आकरः उक्तवान् - किं भ्राता भनातेः ?
भनातेः उक्तवान् – मृत्तिकाकर ! मह्यं मृत्तिकां ददातु।

मृत्तिकां स्वीकृत्य गमिष्यामि,
कुल्हरिकायाः निर्माणं करिष्यामि,
शीतलं जलम् आनेष्यामि,
चञ्चुं प्रक्षाल्य आगमिष्यामि,
तदा अहम् अण्डं खादिष्यामि।



मृत्तिकायाः आकरः उक्तवान् - खनानि मृत्तिकां कथम् ? प्रथमम् आनय खनित्रम् लोहकारात्।
भनातेःगतवान् लोहकारस्य पार्श्वे।
उक्तवान् – अरे ! लोहकार !

लोहकार: उक्तवान्– किं भ्राता भनातेः ?
भनातेः उक्तवान् - लोहकार ! मह्यम् एकं खनित्रम् ददातु।

खनित्रं स्वीकृत्य गमिष्यामि,
मृत्तिकाम् खनयिष्यामि,
कुल्हरिकायाः निर्माणं करिष्यामि,
शीतलं जलम् आनेष्यामि,
चञ्चुं प्रक्षाल्य आगमिष्यामि
तदा अहम् अण्डं खादिष्यामि।

लोहकार: उक्तवान्– स्वीकरोतु खनित्रं प्रेम्णा, परन्तु पुन: आनयतु स्मरणेन।

खनित्रं स्वीकृत्य भनातेः खननक्षेत्रं गतवान्। चिक्कणीं मृत्तिकाम् खातवान् कुम्भकारं दत्तवान् च। कुम्भकार: कुल्हरिकायाःनिर्माणं कृतवान्। काक: तस्यां जलम् पूरितवान् स्व-चञ्चुं च प्रक्षालितवान्। पुन: धावनम् कृतवान् फुदगुद्याः अण्डं खादितुम्।

अधुना पर्यन्तं 'फुदगुदी' इति चटकाया: अण्ड: स्फुटित्वा शावक: बहि: आगत: तथा शावक: उड्डयनं कृतवान्। इदानीं शावक: सुदूरे आसीत्। भनातय: काकस्य गतिसीम्नः।

(अन्नपूर्णा सिन्हा द्वारा भोजपुरी-भाषायां रचिताया: कथाया: संस्कृत-रूपान्तरम्)

एतस्यां कथायां नाटककरणे बालका: बहु आनन्दं प्राप्स्यन्ति तथा क्रियाणां क्रम-अवगमने अपि साहाय्यं प्राप्स्यन्ति।

* काक: कुल्हरिकाया: आवश्यकतां किमर्थम् अनुभूतवान् ?

* एकस्या: कुल्हरिकाया: निर्माणे के के जना: काकस्य साहाय्यं कृतवन्तः ?

* कुल्हरिकां निर्मातुं कुम्भकार: कस्य कस्य वस्तुन: आवश्यकताम् अनुभूतवान् ?

* किं तव गृहे मृत्तिकाया: पात्राणि सन्ति ? कानि कानि पात्राणि सन्ति ?

यदि तुभ्यं कश्चित् चिक्किणीं मृत्तिकां ददाति, तर्हि किं त्वं किञ्चित्पात्रस्य निर्माणं कर्तुं शक्नोषि ?

* **मृत्तिकाया: मोदकम्, मोदकेन कटोरम्**

चिक्किण्याः मृत्तिकायाः आपीडनं कृत्वा एकस्य दीर्घाकारस्य मोदकस्य निर्माणं करोतु। एतस्मिन् मोदके गर्तं निर्माय तं कंसम् इव करोतु। स्वस्य कंसं शुष्कीकरोतु सज्जीकरोतु च। एतस्मिन् स्व-रुचे: वस्तूनि स्थापयतु।



* मृत्तिकाया: सर्प:, सर्पस्य पात्रम्

चिक्कण्याः मृत्तिकाया: जलेन आपीडनं करोतु । किञ्चित् मृत्तिकां जले विलयनं कृत्वा पृथक् स्थापयतु। एतत् मिश्रणं मृत्तिकाया: द्वौ खण्डौ परस्परं योजनस्य कार्ये आगमिष्यति । आपीड्यमानाया: मृत्तिकाया: किञ्चित् भागं स्वीकृत्य तं स्थूलां रोटिकाम् इव समतलं करोतु। अयं पात्रस्य अधोभाग: अभवत् । अवशिष्टाम् आपीड्यमानां मृत्तिकां सर्प: इव दीर्घाकारं करोतु।



चित्रे पश्यतु तथा मृत्तिकया निर्मितं सर्पम् अधोभागे संश्लेष्य पात्राणि निर्मातु।

* मृत्तिकाया: रोटिका:, रोटिकाया: पात्राणि

चित्रं दृष्ट्वा एतेन प्रकारेण पात्राणि निर्मान्तु।



* यदि एतेषु पात्रेषु जलं पूरयित्वा आरात्रिं स्थापयाम: , तर्हि किं भविष्यति ?
* वयं स्व-गृहे अथवा विद्यालये घटे जलं स्थापयाम: । तस्य घटस्य जलेन किमर्थं गलनं न भवति ?
* त्वं कदापि पचमानाः इष्टिका: अथवा पात्राणि अङ्गारकुण्डे दृष्टवान्।

यदि अस्माकं पार्श्वे केवलं मृत्तिकाया: पात्राणि अभविष्यन् तथा सर्वाणि त्रुटितानि अथवा गलितानि अभविष्यन् , तदा वयं किम् अकरिष्याम ?

मृत्तिकया पात्राणां निर्माणकरणे वस्त्राणि मलिनानि भविष्यन्ति परन्तु बालका: कृत्वा अवगमनस्य आनन्दम् अपि प्राप्स्यन्ति।

* बहूनि वर्षाणि पूर्वं यदा पात्राणि न आसन् , तदा जना: किं कुर्वन्ति स्म ?
* जना: पात्राणि किमर्थं निर्मितवन्त: ?

कल्पनां कुरु, एकस्य दिनस्य कृते संसारात् सर्वाणि पात्राणि लुप्तानि भवेयु:, तर्हि तव गृहे किं भविष्यति ?

जानासि ?

बहुवर्षेभ्यः पूर्वम् एक: समय: एतादृश: आसीत् , यदा जनानां पार्श्वे पात्राणि न आसन् । परन्तु जनै: खादनस्य पानस्य च वस्तूनि पक्तुं तथावस्तूनि स्थापयितुं च पात्राणाम् आवश्यकता अनुभूता । अत्यधिकं प्रयत्नेन जना: पात्राणां निर्माणं ज्ञातवन्त: । प्रारम्भे निर्मितानि पात्राणि पाषाणस्य तथा मृत्तिकाया: आसन् । पाषाणस्य पात्राणि हस्ताभ्यां खननं कृत्वा अथवा उत्खननं कृत्वा तथा मृत्तिकाया: पात्राणि आपीडनं कृत्वा हस्ताभ्यां निर्मितानि आसन् । जना: एतत् अपि अन्वेषणं कृतवन्त: आसन् यत् मृत्तिकाया: पात्राणि दृढीकर्तुं तानि पात्राणि अग्नौ पाचनीयानि ।

पञ्चदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
चोंच	-	चञ्चूः
कुल्हड	-	कुल्हरिका
कुम्हार	-	कुम्भकारः
लोहार	-	लोहकारः
खुरपी	-	खनित्रम्
चिकनी मिट्टी	-	चिक्कणी मृत्तिका
चूजा	-	शावकः
भनाते	-	चित्रग्रीवः

16 क्रीडा क्रीडायाम्

वीथौ सर्वे बालका: 'स्टापू' इति क्रीडां क्रीडन्ति स्म: । अवन्तिका अपि स्वभगिन्या नन्दितया सह तत्रैव क्रीडति स्म । परन्तु नन्दिता सम्यक्तया न क्रीडति स्म ।

अवंतिका : अरे ! नन्दिते ! शृणु, सम्यक्तया अवगच्छ ।'ठिप्पी'इति एतं प्रथमे कोष्ठके पातयतु । पुन: 'ठिप्पी'इति युक्तं कोष्ठकं त्यक्त्वा अवशिष्टेषु कोष्ठकेषु एकेन पादेन प्लुतिं करोतु । यदि पङ्क्तौ पादं स्थापयिष्यति तर्हि क्रीडात: बहि: भविष्यति । अन्तिमे कोष्ठके उत्प्लवनं कृत्वा पुन: निवर्तयतु । आगमनसमये 'ठिप्पी'इति अवश्यम् आनयतु । स्मरणं भवेत्, 4 – 5 तथा 7 – 8 कोष्ठकेषु एव द्वौ पादौ स्थापयितुं शक्नोति । अधुना द्वितीये कोष्ठके 'ठिप्पी'इति पातयतु । अनेन प्रकारेण एव सर्वेषु कोष्ठकेषु क्रमश: 'ठिप्पी' इति पातयित्वा क्रीडतु ।

पाठे कानिचन स्थानीय - क्रीडानां नामानि सन्ति । यथा– 'स्टापू', 'पिट्ठू', 'अष्टा-चंगा-पे' इत्यादय: । एता: क्रीडा: क्रीडितुं प्रयुक्तानि वस्तूनि यथा ठिप्पि इत्यादीनां नामानि अपि पाठे आगतानि सन्ति । बालकेषु एतेषां स्थानीय-नाम अधिकृत्य चर्चा कारयितुं शक्यते ।

बालका: पुन: क्रीडायां संलग्ना: अभवन् । पितृव्या बहु समयेन तान् क्रीडन्त: पश्यन्ती आसीत् । तस्या: अपि क्रीडितुं मन: कुर्वन् आसीत् । यदा सा स्थातुं न शक्तवती तदा सा उक्तवती –बालका: !, अहम् अपि युष्माभि: सह 'स्टापू' इति क्रीडां क्रीडानि ?

एतत् श्रुत्वा सर्वे बालका: हसनं प्रारब्धवन्त: ।

अवन्तिका : पितृव्ये ! भवती क्रीडिष्यति ?

पितृव्या : त्वं विचारयसि अहं 'स्टापू'क्रीडां न खेलितुं शक्नोमि ? अरे ! तव वयसि तु वयम् अनेका: क्रीडा: क्रीडाम: स्म ।

नंदिता : का का क्रीडा, पितृव्ये ?

पितृव्या : एकेन पादेन धावनम्, दर्शनादर्शनक्रीडा, 'ऊँच-माँगी-नीच' इति क्रीडा, 'गिट्टे' इत्यादय: क्रीडा च न जाने कां कां क्रीडां अहं क्रीडामि स्म । 'कबड्डी' इति क्रीडायां तु अस्माकं गण: दश-ग्रामेषु प्रथम: आसीत् ।

रजत: : पितृव्ये भवती खेलनस्य एतावन्तं समयं कुत: लभते स्म ? वयं तु खेलनस्य समयं एव न प्राप्नुम: ।

पितृव्या : त्वं दूरदर्शनस्य दर्शनात् अवकाशं प्राप्नुया: तदा एव खलु ।

नन्दिता : पितृव्ये ! किं पितृव्य: अपि एता: सर्वा: क्रीडा: क्रीडति स्म ?

पितृव्या : मा पृच्छ ! तव पितृव्य: वदति यत् स: आदिनं 'गिल्ली-डंडा'क्रीडां, 'कंचे'क्रीडां, 'अष्टा-चंगा-पे' इति क्रीडां, 'पिट्ठू'क्रीडां तथा न जाने कां कां क्रीडां क्रीडति स्म । पितृव्य: वाताटस्य मोहे भोजनम् अपि विस्मरति स्म ।

नन्दिता : आगच्छतु ! क्रीडतु ।

पितृव्या बालकै: सह क्रीडनं प्रारब्धवती । अधुना किञ्चित् कालपर्यन्तम् एव क्रीडितवन्त: आसन् यत् वृष्टे: प्रारम्भ: अभवत् ।

सर्वे बालका: : अहो !

चाची : चलन्तु, सर्वे अस्माकं गृहं चलन्तु, अन्त: चलित्वा क्रीडाम: ।

एतत् श्रुत्वा सर्वे बालका: प्रसन्ना: अभवन् ।

सर्वे बालका: : चलन्तु, चलन्तु पितृव्या: गृहं चलित्वा क्रीडाम: ।

सर्वे बालका: पितृव्या: गृहं गतवन्तः । अन्तः पितृव्य: पितृस्वसा च चतुरङ्गक्रीडां क्रीडन्तौ आस्ताम् ।

अवन्तिका : पितृव्ये ! किं क्रीडेम ?

रजत: : पितृव्ये ! गृहं गृहम् इति क्रीडाम: ।

केचन बालका: : आम्, आम् गृहं गृहम् इति क्रीडां क्रीडाम: ।

रजत: : यदि पाञ्चालिका अभविष्यत् तर्हि वयं पाञ्चालिकया अक्रीडिष्याम ।

पितृव्या : पाञ्चालिका आवश्यकी ? इदानीम् एव निर्माणं कुर्मः पाञ्चालिकायाः ।

पितृव्या एकं पुरातनं वस्त्रं स्वीकृतवती तथा बालका: पितृव्याया: साहाय्येन पाञ्चालिकाया: निर्माणं कृतवन्तः ।

केचन बालका: 'गिट्टे'क्रीडां क्रीडितुम् इच्छन्ति स्म तथा केचन बालका: 'अष्टा-चंगा-पे' इति क्रीडां क्रीडितुम् इच्छन्ति स्म । सर्वे स्वकीयान् स्वकीयान् समूहान् निर्माय क्रीडाम् आरब्धवन्तः ।

पाठे यासां क्रीडानां नामानि आगतानि सन्ति तासां नामानि तालिकायां लिख । एतासु या: क्रीडा: गृहस्य अन्तः क्रीडाम: तासां समक्षं निर्मापय । गृहस्य बहि: क्रीड्यमानायाः क्रीडायाः समक्षं निर्माणं कुरु । क्रीडाया: समक्षं क्रीडकानां संख्यालेखनं न विस्मरणीयम्। क्रीडाया: क्रीडने यदि केषाञ्चित् वस्तूनाम् आवश्यकता भवति तर्हि तेषां नामानि अपि लिखन्तु ।

पाठे आगतानि क्रीडानां नामानि		कियन्त: क्रीडका:	केषां वस्तूनाम् आवश्यकता

तालिकायाः पूरणे बालकानां साहाय्यस्य आवश्यकता भवितुम् अर्हति । परस्परं बालकेभ्यः साहाय्यस्य अवसरं यच्छन्तु। अन्योन्यात् बालका: सहजतया अत्यधिकम् शिक्षयन्ति ।

किं त्वं 'स्टापू' इति क्रीडाया: सदृशां काम् अपि अन्यां क्रीडां क्रीडसि ? तस्या: क्रीडाया: किं नाम अस्ति ? क्रीडां क्रीडितुं भूमौ यस्याः आकृतेः निर्माणं करोषि तस्याः अत्र निर्माणं कुरु ।

* त्वं कुटुम्बे केन सह कां क्रीडां क्रीडसि ?

कुटुम्बस्य सदस्या:	क्रीडाया: नाम
_____	_____
_____	_____
_____	_____
_____	_____
_____	_____

* किं त्वं स्वकीय-क्षेत्रस्य प्रसिद्धं क्रीडकं जानासि ? यदि आम्, तर्हि तस्य नाम तथा च स: कया क्रीडया सम्बद्ध: अस्ति इति लिख।

* त्वं कतीनां क्रीडानां नामानि जानासि यासु कन्दुकस्य प्रयोग: भवति ? अध: दत्ते कन्दुके तासां सूच्या: निर्माणं कुरु।



* किं त्वं सानिया-मिर्जाया: नाम श्रुतवान् ? सा अपि कन्दुकेन एव एकां क्रीडां क्रीडति। अवगच्छ तथा तस्या: क्रीडाया: नाम लिख।

* का क्रीडा तुभ्यं बहु रोचते ?

स्वगृहस्य अथवा समीपस्थस्य केनचित् ज्येष्ठ-जनेन सह सम्पर्कं करोतु पृच्छतु च यदा ते लघु-बाला: आसन् तदा ते कां कां क्रीडां क्रीडन्ति स्म ?

स्थानीयानां प्रसिद्धक्रीडकानां विषये सूचना: एकत्री कुर्वन्तु। या बालकानां क्रीडाविषये ज्ञानं क्रीडकान् प्रति सम्माननं च वर्धयिष्यन्ति।

प्रहेलिकां चित्रेण योजयतु क्रीडाया: नाम लिखतु च।

विविध-वर्णयुता काचस्य गुलिका
साधयित्वा लक्ष्यं विजयति भोली।

_____

सर्प: दशेत् तर्हि अध: आगच्छानि
सोपानं मिलेत् तर्हि त्वरया आरोहाणि।

_____

ग्रीवायां तन्तुं बद्ध्वा
पक्षौ विना एव अहम् उड्डयानि।

_____

साम्राज्ञी, सम्राट्, एकांकयुतं, दास: च
एतानि क्रीडापत्राणि द्विपञ्चाशत्पत्रस्य
क्रीडाया: नाम एतत्।

_____

ताडय त्वं चतुष्कं षट्कं
निर्मास्यसि शतकं नूनम्।

_____



राजा, राज्ञी, मन्त्री आरक्षक: च
सर्वेषां परस्परम् अभवत् कलह:।

_____

बालका: अनेका: क्रीडा: क्रीडितवन्त: स्यु:, दृष्टवन्त: अपि स्यु:। बालका: कासाञ्चन क्रीडानां विषये श्रुतवन्त: स्यु:, पठितवन्त: स्यु: अथवा चलचित्रेषु, नाटकेषु दृष्टवन्त: स्यु:। एते सर्वे विषया: चर्चायां सम्मेलयितुं शक्यन्ते।

क्रीडाया: अतिरिक्तं त्वं किं किं करोषि ?

_____ _____ _____

_____ _____ _____

तव कुटुम्बस्य जना: अध: दत्तेषु चित्रेषु यत् किमपि कुर्वन्ति तेषु चित्रेषु वर्णं पूरय। रिक्तस्थानेषु कानिचित् अन्यानि कार्याणि यानि अपि ते कुर्वन्ति, तेषां चित्रस्य निर्माणं करोतु लिख च।

पठनम्



सीवनं सूचीशिल्पं च

नृत्यम्

जल्पनम्

पादप-वृक्षाणां च पर्यवेक्षणम्

पत्रशुल्क-चिटिकानाम् एकत्रीकरणम्

© NCERT not to be republished

षोडशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
पतंग	-	वाताटः
शतरंज	-	चतुरङ्गक्रीडा
गुडिया	-	पाञ्चालिका
पहेली	-	प्रहेलिका
डाकटिकट	-	पत्रशुल्क-चिटीका

17 पत्रम् आगतम् अस्ति


अहमदः भवान् वदतु, त्वं कथम् असि ? वयं सर्वे भवन्तं स्मरामः । आशा अस्ति यत् अवकाशेषु त्वम् अगरतलाम् आगमिष्यसि । ज्येष्ठान् दीर्घान् च प्रणमामि । तव रीना ।
POST CARD
50
अहमदः अली
गृहसंख्या 5, मालवीयनगरम्,
नवदेहली
1 1 0 0 1 7

अहम् एकं पत्रम् अस्मि । कागदे लेखन्या लिखितं पत्रं, यत् रीना स्वमित्रम् अहमदं लिखितवती । माम् पत्रपेटिकायां स्थापितवन्तः । पत्रवाहकः मां निष्कासितवान् निष्कास्य च एकस्मिन् दीर्घस्यूते स्थापितवान् । अहं पत्रवाहकस्य द्विचक्रिकायाम् आरूढा पत्रालयं च प्राप्ता । तत्र माम् कस्माच्चित् स्यूतात् निष्कासितवान् निष्कास्य च तीव्रवेगेन एका मुद्रा मां ताडितवती । मम उपरि 'अगरतला' इति स्थानस्य मुद्रा आसीत् यतः मम यात्रा आरब्धा अभवत् ।

मुद्रायाः अनन्तरम् अहम् अन्यस्मिन् दीर्घस्यूते प्राप्तवत् । एतस्मिन् स्यूते अनेकानि पत्राणि आसन् यानि देहलीनगरं गच्छन्ति स्मः । पत्रालयस्य रक्तवर्णस्य यानेन अहं रेलस्थानकं प्राप्तवत् । तत्र गत्वा अहं यत् यानं देहलीनगरं गच्छति स्म तस्मिन् आरुढवत् ।

पञ्चशानां दिनानां दीर्घ-यात्रायाः अनन्तरम् अहं देहलीनगरं प्राप्तवत् । तत्रत्यस्य पत्रालयस्य पत्रसङ्केतानुसारं पुनः मम चयनम् अभवत् तथा पुनः मुद्राङ्कनम् अभवत् । एतत् अनन्तरं पत्रवाहकः माम् अहमदस्य गृहं प्रापितवान् ।

अध: रीनाया: पत्रस्य यात्रा चित्रेषु दत्ता अस्ति। परन्तु एतत् किम् ! सर्वाणि चित्राणि अग्रे पृष्ठे अभवन्। क्रमेण चित्रेषु निर्मितेषु गोलकेषु संख्यां लिखतु।

एकं पत्रं रीना अहमदं लिखितवती । अधुना एकं पत्रं त्वं स्वकीय - कक्षायां कस्यचित् मित्रस्य कृते लिख । पत्रस्य उपरि मित्रस्य नाम अवश्यं लेखनीयम् ।

सर्वे पत्राणि लिखितवन्तः ,परन्तु पत्राणि स्थापयिष्यन्ति कुत्र ?

चलन्तु कक्षाया: कृते एकां पत्रपेटिकां निर्माम: ।

1. एकं पादत्राणस्य रिक्तं संपुटकं स्वीकरोतु ।
2. संपुटकं रक्तवर्णेन रञ्जयतु अथवा तस्मिन् कागदं संश्लेषयतु ।
3. अधुना संपुटकस्य शरावं कर्त्तर्या एतावत् कर्तयतु यत् पत्रम् अन्तः गन्तुं शक्नुयात् ।

सिद्धा अभूत् पत्र-पेटिका ।

भवन्त: सर्वे स्व स्व-पत्राणि एतस्यां पेटिकायां स्थापयन्तु तथा स्व-स्वपत्राणां प्रतीक्षां कुर्वन्तु ।

इदानीम् एक: बालक: पत्रवाहक: भवेत् । स: पत्रपेटिकात: पत्राणि निष्काशयेत् तथा सर्वेभ्य: बालकेभ्य: वितरेत् ।

सम्यक् प्रतीतं मित्रस्य पत्रं पठित्वा ?

यथा त्वं स्वकीयं मित्राय पत्रम् अलिख: तथैव तव गृहे अपि सम्बन्धिन: मित्राणि च पत्राणि प्रेषयेयु: । त्वं गृहात् कानिचन पत्राणि आनय पश्य च । दृष्टम्, कतिविधानि भवन्ति पत्राणि ?

* त्वम् एतेषु पत्रेषु कं भेदं दृष्टवान् ?
* केषु पत्रेषु पत्रशुल्क-चिटिका: श्लिष्टा: सन्ति ?
* किं सर्वा: पत्रशुल्कचिटिका: समाना: सन्ति ? तासु कः भेदः अस्ति ?
* किं त्वं पत्रेषु पत्रालयस्य मुद्राङ्कनं दृष्टवान् ?

कक्षायाम् एव स्वमित्रं पत्रं लिखित्वा किमपि वदिष्यन्ति तर्हि बालका: आनन्दिता: भविष्यन्ति तथा तत् तान् पत्र–लेखनाय प्रोत्साहितान् अपि करिष्यति । वास्तविक-पत्राणि दृष्ट्वा बालका: सम्यक् रीत्या अवगमिष्यन्ति ।

काश्चित् भिन्नप्रकाराः पत्र-शुल्कचिटिकाः एकत्रीकृत्वा अधः संश्लेषय।

तव पत्रं तव मित्रस्य पार्श्वे कथं प्राप्तम् ? यतो हि तस्मिन् पत्रे तस्य नाम तथा तस्य पत्रसङ्केतः लिखितः आसीत्।

दत्ते प्रेषकपत्रे त्वं स्वकीयं पत्रसङ्केतं लिख ।

रीनाया: पत्रं रेलयानेन दिल्लीनगरं प्राप्तम्, परन्तु यदा रेलयानानि न आसन् तदा सुदूरेषु स्थानेषु पत्राणि कथं प्राप्नुवन्ति स्म ?

पत्रालयस्य पर्यटनम्

यदि विद्यालयस्य अथवा गृहस्य पार्श्वे पत्रालय: अस्ति तर्हि तत्र गत्वा पश्य यत् पत्राणि कथम् आयान्ति यान्ति च । तत्र अन्यानि कानि कानि कार्याणि भवन्ति ।

- तत्र कानि कानि वस्तूनि सन्ति ?
- तेषां कियत् मूल्यम् अस्ति ?
- रीनया यस्य प्रेषकपत्रस्य उपयोगः कृतः अस्ति, किं भवान् तेन भारतात् बहिः स्वमित्राय सन्देशं प्रेषयितुं शक्नोति ?
- पत्रालये अन्यानि कानि कानि कार्याणि भवन्ति ?

प्राचीनकाले पत्राणि कथं प्राप्नुवन्ति स्म । बालकान् वदन्तु यत् ते ज्येष्ठ-जनान् पृच्छेयुः । प्रेषकपत्रे पत्रसङ्केतं लेखितुं बालका: साहाय्यस्य आवश्यकताम् अनुभवेयु: ।

प्राचीनकालस्य विषये ज्ञातुम् एकं महत्त्वपूर्णं स्रोत: अस्ति – ज्येष्ठजना: । एतेन अवगमनेन बालका: ज्येष्ठ-जनै: सह वार्तां कर्तुं प्रेरिता: भविष्यन्ति ।

एतत् किम् ! रजिया तस्याः आपा च पत्रम् अधिकृत्य कां चर्चां कुर्वन्ति ।

रजिया राधा च ग्रामस्य एकस्मिन् आपणे दूरवाणीं कर्तुम् अचलताम् । राधा दूरवाणीसंख्यां मेलितवती । उभे मातामह्याः वार्तां कृतवत्यौ । आपणिकाय धनं दत्तवत्यौ तथा प्रसन्नतया गृहं प्रत्यागतवत्यौ ।

* त्वं दूरभाषां कुत्र कुत्र दृष्टवान् ?

_____

* त्वं दूरभाषायां केन सह वार्तां करोषि ?

_____ _____ _____

* तव पत्रलेखनम् अथवा दूरवाण्यां सम्भाषणकरणम् इति उभयोः किं सम्यक् प्रतिभाति ?

_____

लिङ्गभेदस्य विषये चर्चां कारयन्तु तथा च एतेन सम्बद्धविषयेषु चर्चां कुर्वन्तु, यथा प्रविधिः (टैक्नोलॉजी), विविधव्यवसायैः सह सम्बद्धाः लिङ्गभेदाः ।

* दूरभाषाः अपि विविधाः भवन्ति । त्वया याः दूरभाषाः दृष्टाः तासां चित्राणां निर्माणं करोतु ।

* एताभिः दूरभाषाभिः किं किं कार्यं भवितुं शक्नोति ।

* स्वकीयायाः दूरभाषायाः निर्माणं करोतु

एतस्य कृते आवश्यकम् भवेत्- अग्निपेटिकाद्वयम् अथवा हिमपेयस्य कर्परद्वयं सूत्रं च । द्वयोः अग्निपेटिकयोः छिद्रं करोतु । एकस्याः अग्निपेटिकायाः छिद्रात् सूत्रं निष्कास्य ग्रन्थिं ग्रथ्नातु । सूत्रस्य द्वितीयं प्रान्तं द्वितीयायाः अग्निपेटिकायाः छिद्रात् निष्कास्य ग्रन्थिं ग्रथ्नातु । निर्मिता भवतः स्वकीया दूरवाणी । स्वकीयम् एकं मित्रं दूरवाण्याः एकं प्रान्तं कर्णे योजनाय कथयतु तथा द्वितीयं प्रान्तं स्वकीयमुखे स्थापयतु । अवधानं भवेत् यत् सूत्रम् आकर्षितं भवेत् कुत्र अपि सूत्रस्य स्पर्शः न भवेत् । आरम्भं करोतु स्वकीयां वार्ताम् ।

* भवान् स्वस्य कृते एकस्याः दूरभाषायाः स्वरूपं निर्मापयतु, अस्याः विशेषतां वदतु च । वयं पत्रम् अपि लिखितवन्तः दूरभाषाम् अपि कृतवन्तः । वदन्तु, पत्रे दूरभाषायां च का समानता अस्ति, का भिन्नता अस्ति च ।

* यदि पत्रालयः न स्यात् तर्हि के के अन्ये विधयः स्युः ।

बालकेभ्यः स्वस्य रचनात्मकान् विचारान् प्रस्तोतुं, चित्रयितुं, व्यक्तीकर्तुं च यच्छन्तु । स्थानीयपरिवेशं दृष्ट्वा बालेभ्यः सञ्चारस्य अन्यमाध्यमेषु यथा दूरभाषायन्त्रम्, ई-मेल, फैक्स इत्यादिषु अपि चर्चां कर्तुं शक्यते । ज्येष्ठेभ्यः सञ्चारसेवायाम् आगतानि परिवर्तनानि ज्ञातुं बालान् प्रेरयन्तु ।

सप्तदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
डिब्बा	-	संपुटकः
ढक्कन	-	शरावः
कप	-	कर्परः
ईमेल	-	ईपत्रसङ्केतः
फैक्स	-	दूरप्रकाशनयन्त्रम्
पोस्टकार्ड	-	प्रेषकपत्रम्

18 एतादृशानि अपि भवन्ति गृहाणि

मम नाम नसीम: अस्ति । अहं श्रीनगरे निवसामि । ह्य: आरभ्य: अस्माकं विद्यालये बहुः उल्लास: अस्ति । अयम् उल्लास: सप्तदिनानि यावत् भविष्यति । जानासि किमर्थम् ? यतो हि अस्माकं विद्यालये शिविरं चलति । शिविरे अनेकेभ्य: स्थानेभ्य: बालका: आगता: सन्ति । सर्वेषां वासस्य व्यवस्था समभूमौ मण्डपं कृत्वा कृतम् अस्ति ।

वयं विद्यालयस्य बहु सज्जां कृतवन्तः । केचन बालका: वस्त्राणां शकलै: वस्त्रप्रान्तान् निर्माय, तान् द्वारे योजितवन्तः । केचन बालका: वातादानां त्वग्भि: भित्तचित्राणां निर्माणं कुर्वन्ति । कुत्रचित् शुष्कै: पत्रै: तथा काष्ठस्य चूर्णेन रञ्जनीयं निर्मान्ति ।

भवनानां विविधतां प्रदर्शयितुं कानिचन स्थानानि यथा श्रीनगरम्, असम:, राजस्थानं, देहली मनाली च इति एतेषाम् उपयोग: अभूत् । एतेषां स्थानानां परिवेशम् अवगमनेन बालका: एतानि भवनानि सम्यक्तया अवगमिष्यन्ति ।

अद्य शिविरस्य प्रथमं दिनम् अस्ति । वयं बहु प्रसन्ना: स्मः । प्रात: सर्वे बालका: एकत्रिता अभवन् । सर्वे बालका: भूमौ एकां गोलाकृतिं निर्माय उपविष्टवन्तः । सर्वे स्व-स्व परिचयं दत्तवन्त: । सर्वे स्वकीय-विषये उक्तवन्त: यत् ते कुत्र निवसन्ति, किं खादितुम् इच्छन्ति । बालका: स्वकीयै: सह स्वकीय-गृहस्य कुटुम्बस्य च छायाचित्राणि अपि आनीतवन्त: । क्रमश: बालका: स्वगृहाणां विषये अपि उक्तवन्तः । सर्वप्रथमं भूपेन्द्रस्य समूहस्य क्रम: आगत: ।

भूपेन्द्र: स्वकीयं नाम उक्तवान् कथितवान् च –

अहम् असमराज्यस्य मोलनग्रामात् आगतवान् अस्मि । अस्माकं क्षेत्रे वृष्टि: बहु अधिका भवति । अत: अस्माकं गृहाणि भूमित: प्राय: दशत: द्वादश-चरणमानानि उन्नतानि भवन्ति । एतेषां गृहाणां निर्माणं दृढेषु वंशीस्तम्भेषु भवति । एतानि गृहाणि अन्तस्तात् अपि काष्ठेन निर्मितानि भवन्ति ।

* किमर्थं भूपेन्द्रस्य क्षेत्रे गृहाणि वंशीस्तम्भेषु निर्मितानि भवन्ति ?

* एतेषां भवनानां छदींसि कीदृशानि सन्ति ? एतानि ईदृशानि किमर्थं निर्मीयन्ते ?

* एतेषु भवनेषु अन्त: गमनस्य क: विधि: अस्ति ?

* किमर्थं रात्रिकाले एतेषां भवनानां सोपानानि अपसार्यन्ते ।

इदानीम् आगत: चमेल्या: पर्याय: । सा उक्तवती –

अहं मनालीत: आगतवती, यत् एकं पर्वतीय - क्षेत्रम् अस्ति । अस्माकं क्षेत्रे वृष्टि: बहु अधिका भवति तथा हिमपात: अपि भवति । यदा शैत्यम् अधिकं वर्धते तदा आतपे उपवेशनं सम्यक् प्रतिभाति । अस्माकं भवनानि पाषाणै: अथवा काष्ठै: निर्मितानि भवन्ति ।

* चमेल्या: गृहं कस्मिन् क्षेत्रे अस्ति ?

* चमेल्या: भूपेन्द्रस्य च भवनानां छदिस्सु का समानता अस्ति ?

* एतादृशानि छदींसि एतादृशेषु क्षेत्रेषु कथं साहाय्यं कुर्वन्ति ?

मिताली अनुजः च उक्तवन्तौ -

मिताली अनुज: च देहलीत: आगतवन्तौ । तौ सर्वान् देहल्या: चित्राणि दर्शितवन्तौ । एकस्मिन् चित्रे उन्नतानि भवनानि दृष्ट्वा भूपेन्द्र: उक्तवान् - अरे ! एतावन्ति उन्नतानि भवनानि । एतेषु उपरि पर्यन्तं कथम् आरोहन्ति ।

एतानि भवनानि पश्यन्तु जानन्तु च यत् किं भवतां क्षेत्रे अपि एतादृशानि भवनानि सन्ति ?

जना: उन्नतानां भवनानाम् उपरि आरोहणं कथं कुर्वन्ति ?

देहली भारतस्य राजधानी अस्ति। देहली तथा तस्य सदृशेषु दीर्घनगरेषु ग्रामेभ्य: उपनगरेभ्य: च जना: कार्यस्य अन्वेषणाय आयान्ति । एते जना: प्राय: नगरे आगत्य अत्रत्य एव निवासिन: भवन्ति। अत्र जना: अधिका: निवसन्ति तथा वासस्य कृते स्थानं न्यूनम् अस्ति। अत्र बहव: जना: एतादृशा: भवन्ति येषां पार्श्वे स्वकीय - भवनानि न भवन्ति। केचन जना: कुटीरेषु निवसन्ति तथा केषाञ्चित् जनानां पार्श्वे कुटीरम् अपि नास्ति । जना: यत्र अपि स्थानं प्राप्नुवन्ति तत्र एव शयनं कुर्वन्ति - मार्गे, पादपथे, स्थानके इत्यादिषु स्थानेषु। सत्यं नगरेषु गृहस्य बहु गभीरा समस्या अस्ति।

काशीराम: अवदत् –

अहं राजस्थानस्य एकस्मात् ग्रामात् आगतवान् अस्मि । अस्माकं क्षेत्रे वृष्टि: बहु न्यूना भवति तथा अत्यधिक - उष्णता भवति। वयं मृत्तिकाया: गृहेषु निवसाम: । गृहाणां भित्तय: बहु स्थूला: भवन्ति। एता: भित्ती: मृत्तिकया लेपित्वा सुन्दरी: क्रियन्ते। छदींसि कंटकितै: कंटगुल्मै: निर्मितानि भवन्ति।

बालकै: सह गृहविहीनानां जनानां विषये संवेदनशीलतया वार्ताकरणस्य आवश्यकता अस्ति।

अनेन प्रकारेण सर्वे समूहा: स्व-स्व गृहाणां विषये उक्तवन्तः। परिचयस्य अनन्तरं समीचीन: कार्यक्रम: अभूत्। बालका: विभिन्नानि नृत्यानि अकुर्वन्। बालका: स्व-स्व-भाषायां लोकगीतानि श्रावितवन्तः। सर्वे एला वातादयुक्तं च चायम् पीतवन्तः। बहु आनन्द: आगत:।

सायं काले वयं 'डल' इति सरोवरं भ्रमणाय गतवन्तः। तत्र वयम् एकां गृहनौकां दृष्टवन्तः। 'शिकारा' इति नौकायाम् उपविष्टवन्त:। केचन बालका: 'चप्पू' इति एतं चालितवन्तः। परितः नीलाः पर्वताः मध्ये (चार चिनारी)



* गृहनौका अपरेभ्यः गृहेभ्यः पृथक् अस्ति। कथम् ?

* किं त्वम् एतादृशेषु गृहेषु वस्तुं शक्नोषि ? किम् ?

* चित्रं दृष्ट्वा मेलयतु

घोषः

हिमस्य गृहम् (इग्लू)

मण्डपः

गृहनौका

बहुतलयुक्तं गृहम्

✱ भवतः गृहं कैः कैः वस्तुभिः निर्मितम् अस्ति, तेषां नामसु (✓) इति चिह्नं योजय –

तृणम् ☐	मृत्तिका ☐	काष्ठम् ☐	अस्मचूर्णः ☐	चित्रनिर्माण फलकम् ☐	अयः ☐
प्यास्टिकः ☐	चूर्णकम् ☐	वंशः ☐	इष्टिका ☐	काचम् ☐	पाषाणः ☐

स्वस्य गृहस्य समीपस्थानि गृहाणि पश्य। तानि कैः कैः वस्तूभिः निर्मितानि सन्ति ? तेषां सूचेः निर्माणं कुरु।

_____ _____ _____ _____

_____ _____ _____ _____

✱ गृहाणि यैः वस्तुभिः निर्मीयन्ते, तेषां वस्तूनां प्रतिरूपाणि एकत्रीकुरुत -

✱ **आगच्छत इष्टिकायाः निर्माणं कुर्याम ।**

स्निग्धमृत्तिकाम् आपीडय तथा च रिक्त-अग्निपेटिकायां प्रणुद्य पूरय । शोषयित्वा निष्कासय। तव लघु-इष्टिका सिद्धा भवति।

स्वस्य इष्टिकायां विविध-वर्णान् योजय। तस्याः उपरि स्वस्य नाम लिख। एताः सर्वाः इष्टिकाः सम्मेल्य एकस्य चित्रस्य (कर्बुरस्य) गृहस्य निर्माणं कुरु, गृहस्य छदिसः अपि निर्माणं कुरु।

♦ विविधानां गृहाणां चित्राणि एकत्रीकुरु, अथवा तेषां चित्राणि निर्मापय, चित्रेभ्यः एकस्य शोभनस्य पटस्य निर्माणं कुरु, तथा च तद् चित्रं कक्षायां सज्जीकुरु।

गृहाणि कैः वस्तूभिः निर्मीयन्ते, बालकाः स्वस्य समीपस्थानि विद्यमानानि वस्तूनि एकत्रीकृत्य सम्यक्तया बालकाः बोद्धुं शक्नुवन्ति।

अष्टादशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
कैंप	-	शिविरम्
बादाम	-	वातादः
झोपड़ी	-	घोषः
तंबू	-	मण्डपः
हाउस बोट	-	गृहनौका
घाँस	-	तृणम्
सीमेंट	-	अस्मचूर्णः
केनवास	-	चित्रनिर्माणफलकम्
लोहा	-	अयः
पत्थर	-	पाषाणः

19 जन्तवः अस्माकं मित्राणि

‘टक’ इति ध्वनिना कक्षायां सर्वे अपि छात्राः चकिताः अभवन् । ध्वनिः छदिसि विद्यमानात् व्यजनात् आगतः आसीत् । कल्याणी चित्कारं कृतवती, पश्यतु - पश्यतु । तस्मिन् कोणे पश्यतु । पक्षिव्यजनेन आहतः । बालक -पीटरः झटिति उत्थाय पक्षिणम् उत्थापितवान्, पक्षी अत्यधिकम् व्याकुलः आसीत् ।



बालक-नवजोतः एवञ्च बालक-अलीः शीघ्रं गत्वा एकस्मिन् कंसे जलम् आनीतवन्तौ, पीटरः प्रेम्णा पक्षिणं संवोढवान् । जलस्य कंसः पक्षिणः चञ्च्वोः समीपं स्थापितवान्, पक्षी किञ्चित् जलं पीतवान् । जलं पीत्वा पक्षी फटफटायितुं प्रारब्धवान् । नवजोतः सर्वान् बालकान् पृष्ठे प्रेषितवान्, ते दृष्टवन्तः पक्षी शनैः शनैः उड्डयितुं प्रयतमानः आसीत्, तस्मिन्नेव काले फुर्र इति ध्वनिना पक्षी बहिः उड्डितवान् ।

अग्रिमे दिवसे बालकाः दृष्टवन्तः एकः पक्षी प्रकोष्ठे भ्रमन् आसीत्, बालकाः एतत् ज्ञातुं प्रयत्नं कृतवन्तः यत् सः गतदिवसीयः पक्षी आसीत् वा ? इति । तेषां प्रतीतं यत् सः एव पक्षी अस्ति इति । ते शीघ्रं व्यजनं पिहितवन्तः करताडनध्वनिं च आरब्धवन्तः ।

वाक्यानि यथाक्रमं स्थापयत –

- पीटरः पक्षिणं प्रेम्णा संवोढवान् । ☐
- बालकाः दृष्टवन्तः एकः पक्षी तेषां कक्षायां भ्रमन् अस्ति । ☐
- नवजोतः अलीः च शीघ्रं गत्वा एकस्मिन् कंसे जलम् आनीतवन्तौ । ☐
- फुर्र...इति ध्वनिं कुर्वन् पक्षी कक्षातः बहिः उड्डितवान् । ☐
- पक्षी पङ्खरहितः सञ्जातः । ☐

शङ्करः बहुः प्रसन्नः आसीत् । यतः तस्य गृहस्य अङ्गणे विडाली चतुरः शिशून् जनितवती आसीत् ।

सः स्वस्य रिक्तसमयं तत्रैव यापयितुं प्रारब्धवान् । एकस्मिन् प्रातः बिडाल्याः रोदनस्य ध्वनिं श्रुत्वा शङ्करस्य निद्राभङ्गः अभूत्, (वदत, बिडाली कथं रोदिषि ?) सः अङ्गणं प्रति धावितवान्, सः दृष्टवान् बिडाली स्वस्य त्रीन् पुत्रान् स्वस्य वक्षस्थले संश्लिष्य रुदन्ती आसीत् । एकः पुत्रः लुप्तः आसीत्, बहिः गत्वा दृष्टवान् तदा मालिनी बिडाल्याः पुत्रं संवाहयन्ति आसीत् ।

शङ्करः मालिनीं गृहस्य अङ्गणे आहूतवान्, मालिनी दृष्टवती बिडाली रुदन्ती अस्ति ।

चिन्तय, मालिनी किं कृतवती स्यात् ।

जन्तूनां भावनायाः विषये चर्चा-करणेन बालकाः जन्तून् प्रति संवेदनशीलाः भवितुम् अर्हन्ति ।

भोली, मीन्वाः (मीनू- काचित् बालिका) गौः अस्ति। मीनूः प्रत्येकं प्रातः भोलीगाम् उपशल्यभूमौ चारयितुं नयति।

कस्मिंश्चित् दिने वेगेन आगच्छता 'स्कूटर्' यानेन भोलीगोः पादः आहतः। अतः पादात् रक्तं स्रवत् आसीत्।



अधुना मीन्वाः गृहस्य जनाः किं करिष्यन्ति ?

* चन्दूरजकः स्वस्य गर्दभस्य बहुः अवधानं करोति। गर्दभः अपि तु बहुः कार्यं करोति।

चित्राणि दृष्ट्वा लिखत यत् चन्दूः स्वस्य गर्दभस्य कृते किं किं करोति ?

* किं भवतः गृहे अथवा समीपस्थे कस्यापि गृहे कश्चित् पालित-जन्तुः वर्तते ? यदि अस्ति तर्हि कः ?

---

* किं त्वं तं प्रेम्णा केन अपि विशेषनाम्ना आह्वयसि ? केन नाम्ना ?

---

* त्वं किं करोषि यदा तव पालित–जन्तुः –
  - बुभुक्षितः भवति। ----------
  - घर्मेण अथवा शैत्येन पीडितः भवति। ----------
  - केन अपि पीडितः भवति। ----------
  - आहता भवति। ----------

* वयं काँश्चन जन्तून् पालयामः। तेषां संरक्षणमपि कुर्मः, तालिकायां केषाञ्चित् जन्तूनां नामानि सन्ति। यान् वयं पालयामः, तालिकां पूरयत।

जन्तूनां नामानि	एतान् किमर्थं पालयामः
कुक्कुरः	
	दुग्धं ददाति
	यानं कर्षति
वृषभः	
कुक्कुटी	
मत्स्यः	
	प्रिय अथवा प्रिया भवति।
मधुमक्षिका	

वयं जन्तून् पालयामः, तथा च तेषां संरक्षणं कुर्मः- एतस्य सम्बन्धस्य अवगमनेन बालकानां तेषां परिवेशे जन्तूनां परस्परं निर्भरतां ज्ञातुं सरलता भवति।



पक्षिणां पयःशाला

मृत्तिकायाः एकं विस्तृतमुखि पात्रं स्वीकुरुत, पात्रं रज्जुना बद्ध्वा आलम्बयत यथा चित्रे दर्शितम् अस्ति । अधुना तस्मिन् पात्रे जलं संस्थाप्य कस्यापि वृक्षस्य शाखायाम् अथवा गृहस्य बहिः कस्मिंश्चित् कीलके अवलम्बयत । तस्मिन् पात्रे प्रतिदिनं जलं पूरयत । पश्यत पातुं के के पक्षिणः तत्र आगच्छन्ति ?

* जलस्य आवश्यकता अस्माकम् अपि अस्ति, एवञ्च जन्तूनां कृतेऽपि अस्ति । एतादृशानि एव कानिचित् अन्यानि वस्तूनि सन्ति, येषां वस्तूनाम् अस्माभिः एवञ्च जन्तुभिः प्रयोगः क्रियते । एतादृशानि एव त्रयाणां वस्तूनां नामानि लिखत ।

_____

_____

_____

त्वया प्रायः भोजनम् अपि स्वस्य सूचिकायां स्थापितं स्यात् ।

त्वं जानासि एव अस्माकं भोजनं कियत् विविधम् अस्ति, एवमेव जन्तूनां भोजनमपि विविधं भवति ।

* किं त्वया कदापि के अपि जन्तवः किमपि खादयिताः अथवा के अपि अन्ये किमपि खादयन्तः दृष्टाः ? यदि अस्ति तर्हि तालिकायां लिखतु ।

पक्षिणां पयःशालां निर्मातुं बालकानां साहाय्यं क्रियेत । एतत् बहिः स्थाप्येत येन बालकाः समीपात् पक्षिणां दर्शनं कर्तुं शक्नुयुः तथा च तेषां विषये बहून् अंशान् बालकाः जानीयुः ।

कं जन्तूं भोजितवान्	किं भोजितवान्
_____	_____
_____	_____
_____	_____
_____	_____
_____	_____

* त्वम् एतान् जन्तून् किमर्थं भोजनं खादयसि ?
* कं जन्तुम् अधिकाः बालकाः भोजनं भोजितवन्तः ?
* तं किं किं भोजितवन्तः ?

पश्य, किं तव तालिकायाम् एतेषाम् अपि नामानि सन्ति ? अवगच्छ, एते किं खादन्ति ?

मूषकः	दीर्घतुण्डी	ऊर्णुनाभः	गृहगोधिका
काकः	वृक्षशायिका	वानरः	सूकरः

चिन्तयत, किं कदापि तव जन्तवः तव आज्ञां विना तव भोजनं खादितवन्तः सन्ति ? कथम् ?

_____

_____

_____

_____

के किं खादन्ति ? तत् रेखाचिह्नेन मेलय, एकम् उदाहरणं दत्तम् अस्ति ।



तालिकायां जन्तूनां नामानि लिखतु ।

एतादृशाः जन्तवः ये त्वया स्पृष्टाः स्युः ।	एतादृशाः जन्तवः येषां स्पर्शः त्वया न कृतः किन्तु स्प्रष्टुं शक्नोषि ।	एतादृशाः जन्तवः येषां स्पर्शं त्वं कर्तुं न शक्नोषि
_____	_____	_____
_____	_____	_____
_____	_____	_____
_____	_____	_____

त्वं दृष्टवान् यत् केषाञ्चित् जन्तूनां वयं स्पर्शं कर्तुं शक्नुमः, ये अधिकाधिकम् अस्माकं गृहे तथा च समीपे निवसन्ति । एतेषु केचन अस्माकं साहाय्यं कुर्वन्ति ।

केषाञ्चित् जन्तूनां समीपं वयं न गच्छामः, भयात् कदाचित् दंशनं न कुर्युः, हानिं न कुर्युः खादनम् एव वा न कुर्युः ! इति खादेयुः ।

बालकैः सह एतां चर्चां कर्तुं शक्नुमः, यत् पशु-पक्षिणां स्पर्शनस्य अर्थः अस्ति तेषां प्रेम्णा संवाहनं न तु पीडनम् इति । अग्रिमे पृष्ठे चित्रैः दर्शिता कथा प्रकृतौ संतुलनं दर्शयति, बालकानाम् अस्य अंशस्य बहुसरलतया स्पष्टीकरणम् अत्यन्तम् अपेक्षितम् वर्तते ।

रान्याः वाटिका

चित्रं पठन्तु कक्षायां चर्चयन्तु च –

रान्याः वाटिकातः उद्यानपालकः आम्रपेटिकाः आनीतवान् अस्ति।
1
बहूनि आम्रफलानि बहुः सम्यक् !
2
महाराज्ञि, यदि पक्षिणः न अखादिष्यन् तर्हि आम्रफलानि द्विगुणितानि अभविष्यन्।
3
किम् उक्तम्? पक्षिणः आम्रफलानि खादितवन्तः ? त्वं पक्षिणः वाटिकायाम् आगन्तुं किमर्थं दत्तवान् ?
4
दोषः अभवत् महाराज्ञि। अद्यारभ्य कान् अपि पक्षिणः आगन्तुं न ददामि।
5
पूर्वस्य अपेक्षया अपि न्यूनानि आम्रफलानि ! वाटिकायां पक्षिणां आगमनं किमर्थं न निषिद्धम्।
6
अग्रिमे वर्षे
निषेधः कृतः आसीत्, महाराज्ञि, एकमपि पक्षिणं प्रवेष्टुं न दत्तवान्, अस्मिन् पर्याये फलेषु कीटसंक्रमणम् अभूत्।
7
यदि पक्षिणः स्युः तर्हि पक्षिणः कीटान् खादितवन्तः स्युः , एतावन्ति फलानि नष्टानि न स्युः
8

नवदशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
सेवा करना	-	शुश्रूषा
शीघ्र	-	झटिति
मुर्गी	-	कुक्कुटी
छछूँदर	-	दीर्घतुण्डी
मकडी	-	ऊर्णुनाभः
छिपकली	-	गृहगोधिका
गिलहरी	-	वृक्षशायिका
सहलाना	-	संवाहनम्

20 बिन्दु-बिन्दुना

राजुः राजस्थानस्य बज्जूग्रामे निवसति। ग्रामे यदि पश्यामः तर्हि परितः बालुका एव दृश्यते, यदा बालुका न उड्डयते तदा कानिचित् गृहाणि दृश्यन्ते।

राजोः गृहे सर्वेऽपि पीडिताः सन्ति। एतादृशमेव घर्मकाले जलस्य बहुन्यूनता भवति। अस्मिन् वर्षे तु वृष्टिरेव न जाता, अधुना तस्य मात्रा एवञ्च भगिन्या जलम् आनेतुं बहुः दूरं गन्तव्यं भवति। पार्श्वस्थं कूपं शुष्कं जातम्, प्रतिदिनं चतुरः घटान् पूरयितुं बहुसमयः गच्छति। घर्मकाले बालुकायां चलित्वा चलित्वा तेषां पादाः न केवलं ज्वलन्ति अपि तु पादेषु व्रणः अपि जायते।

ऊपरि चित्रे दूरं गत्वा जलम् आनयन्त्यः तथा च जलं पूरयन्त्यः महिलाः दर्शिताः सन्ति। लिङ्गभेदसम्बद्धाः वार्तासु / समस्यासु कक्षायां चर्चां कारयन्तु।

ग्रामे प्रसन्नतायाः ऊर्मिः तदा आगच्छति । यदा रेलयानात् जलम् आगच्छति, राजोः पिता ऊष्ट्रयाने जलम् आनेतुं गच्छति । किन्तु एतादृशः अवसरः न आगच्छति जनाः जलस्य प्रतिक्षां कुर्वन्तः एव भवन्ति ।



केचन वृष्टेः जलम् एकत्रीकुर्वन्ति । एतत् सम्यग्तया क्रियते, शङ्कुं निर्माय, किं त्वं जानासि शङ्कुः किं भवति ? तथा च एतद् कथं निर्मीयते ?

अङ्गणे गर्तं निर्माय तं दृढीकृत्य शङ्कुः निर्मीयते । शङ्कुं शरावेण पिधाय स्थापयन्ति । शङ्कोः कृते गृहस्य छदिषः किञ्चित् विलाप्य स्थापयन्ति । एतेन छदिसि पतितं वृष्टेः जलं नालिकया अधस्तने शङ्कौ एकत्रितं स्यात्, छदिसः नालिकायां जालिकां स्थापयन्ति । येन कङ्कणादिकं शङ्कौ न गच्छेत् ।

एतद् जलं स्वच्छीकृत्य पातुं शक्नुमः, कदाचित् ग्रामस्य एकस्मात् शङ्कोः राजुम् अपि जलम् आनेतुं यच्छन्ति ।

चिन्तयत ! जलस्य न्यूनकारणात् जनानां काः काः समस्याः उत्पद्यन्ते ?

* राजोः ग्रामस्य जनाः पातुं जलं कुतः आनयन्ति ?
* राजोः गृहे जलं संपूर्यं कः आनयति ?
* शङ्कोः जलम् अधिकतया पातुम् एव कार्यम् आगच्छति । किमर्थम् ?
* अधुना त्वं वद, किं तव गृहेऽपि वृष्टेः जलम् एकत्रीक्रियते ? यदि आम्, तर्हि कथम् ?
* किं जलम् एकत्रीकर्तुम् अन्ये अपि उपायाः भवितुं शक्नुवन्ति ?

यदि जलम् एकत्रीकर्तुं परिसरस्य उपायेषु बालकाः स्वस्य अनुभवान् परस्परं वितरिष्यन्ति तर्हि पुस्तकीयं ज्ञानं जीवनस्य अनुभवैः सह सम्बद्धुं शक्ष्यन्ति ।

राजोः इव राधिकायाः गृहेऽपि जलस्य न्यूनता अस्ति, राधिका भावनगरे निवसति। नलिकायां प्रतिदिनं केवलम् अर्धहोरा एव जलम् आगच्छति। वसतेः सर्वेऽपि जनाः एकस्मिन् एव नलिकायाम्, चिन्तयत कियती दुःस्थितिः भवेत्।

राधिका जलं पूरयितुं तत्परा तिष्ठति। यदा अवसरं प्राप्नोति, बिन्दुभिः अपि द्रोणीं पूरयति। आगच्छन्तु जानीमः यत् कंसः अथवा द्रोणी कतिभिः बिन्दुभिः पूर्णः भवति।

चित्रेषु दर्शितस्य उपायेन प्रयोगं कुरुत, ज्ञानं कृत्वा रिक्तपेटिकायां लिखत -



1. एकस्मिन् चमषे कति बिन्दवः भवन्ति।

2. एकस्मिन् कंसे कति चमसाः भवन्ति।

3. एकस्मिन् मगपात्रे कति कंसाः ?

4. एकस्यां द्रोण्यां कति मगपात्राणि ?

पश्यतु, बिन्दु-बिन्दुभिः कियत् जलम् ?

© NCERT not to be republished

यदि नलिकातः जलबिन्दवः पतन्तः भवन्ति । तर्हि जलं कियत् नष्टं भविष्यति । एतेषु चित्रेषु एतदेव जायमानं वर्तते ।



जलस्य रक्षणार्थं त्वं किमपि चिन्तयितुं शक्नोषि ? स्वस्य विचारान् लिखतु –

_____ _____ _____

_____ _____ _____

किं त्वं गृहे विद्यालये, मार्गे च जलं नश्यत् दृष्टवान् असि ? कुत्र ?

_____

_____

चित्रं दृष्ट्वा चर्चां कुरु- किम् एकस्मिन् पर्याये जलस्य प्रयोगानन्तरं तेनैव जलेन अन्यद् किमपि कार्यं कर्तुं शक्नोषि ?

यस्मिन् स्थाने जलस्य न्यूनता भवति, तत्र जनाः जलस्य रक्षणार्थम् अथवा तस्य वारद्वयं प्रयोगार्थं बहून् उपायान् अन्विष्यन्ति, बाध्यतया जनाः एतादृशं कुर्वन्ति । एतां वार्तां ज्ञात्वा बालकाः स्वकीयजीवने जलस्य रक्षणार्थं काश्चन उपायान् यदि करिष्यन्ति तर्हि जलं सर्वेषाम्




पृथक् पृथक् वर्णैः रेखां कर्षयित्वा दर्शय, किं कार्यानन्तरं किं कार्यं करिष्यसि। येन तदेव जलं पुनः पुनः प्रयोक्तुं शक्येत, एकम् उदाहरणम् अधः प्रदत्तं वर्तते।



त्वया जलस्य पुनः पुनः प्रयोगस्य केचन उपायाः दर्शिताः, एतद् आधिक्येन जनाः कष्टेषु एव कुर्वन्ति, यत्र जलस्य बहुन्यूनता भवति। जानासि जलस्य न्यूनता एतदर्थम् अपि भवति, यतो हि केचन जनाः जलम् एतादृशमेव नष्टं कुर्वन्ति। चिन्तय, कियत् सम्यक् स्यात् यदि सर्वेभ्यः जलं मिलेत्।

प्रयुक्तस्य जलस्य उपयोगविषये पुनः चर्चा क्रियेत। एषा चर्चा जलसंरक्षणस्य महत्त्वावगमने सहायकः भविष्यति। अस्मिन् विषये बालानां परामर्शस्य श्रवणम् एतेषां परामर्शानां जीवने पालनाय प्रेरणं च उपयोगी भविष्यति।

विंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
लहर	-	ऊर्मिः
ढक्कन	-	शरावः
टाँका	-	शङ्कुः
आँगन	-	अङ्गणः

21 विविधाः कुटुम्बाः

वदत कियन्तः ?

आगच्छत, सर्वे सम्मिल्य एकां क्रीडां क्रीडेम, एतां क्रीडां यूयम् अवश्यमेव जानीयात।

सर्वे बालकाः एकस्यां रेखायां स्थिताः भवन्तु।

एका बालिका रेखायाः मध्ये स्थित्वा कञ्चित् तालं वादयेत्, यावत् पर्यन्तं तालवादनं चलन् भवति तावत् पर्यन्तं सर्वे रेखायां पलायन्तः भवन्तु।

या तालं वादयति सा सहसा तालिकां निरुध्य, काञ्चित् अपि लघुसंख्यां यथा पञ्च, चत्वारः, द्वे वा उच्चैः स्वरेण वदेत्।

यदा तालिकायाः अवरोधः भवति, तदा यावतीं संख्यां वयं वदामः तावत्यया एव संख्यया समूहस्य निर्माणं कुर्वन्तु।

ये बालकाः कस्मिन्नपि समूहे नागच्छन्ति, ते क्रीडातः बहिः भविष्यन्ति।

यावत् पर्यन्तं बालकद्वयं शिष्येत् तावत् पर्यन्तम् एतां क्रीडां क्रीडन्तः भवन्तु।

आगच्छत, अधुना क्रीडायाः विषये काश्चन वार्ताः कुर्मः

- यदा त्वं सम्यक् संख्यायाः समूहे सम्मिलितः अभवः तदा त्वं कथं चिन्तयसि ? किमर्थम् ?
- यदि त्वं कस्मिन्नपि समूहे सम्मेलितुं न शक्तवान् तदा त्वं कथं चिन्तितवान् ? किमर्थम् ?
- तुभ्यं जनैः सह वासः रोचते वा ?
- कैः कैः जनैः सह तुभ्यं वासः रोचते ?
- यदा त्वया सर्वदा एव एकाकी भवितव्यं भवेत् तदा तव कथं प्रतीयेत।

'वदन्तु भ्रातरः कतिषु' क्रीडासु तालस्य वादनं संख्यायाः उच्चारणं च कश्चिद् अपि कर्तुं शक्नोति। बालकानां संख्यानुसारेण उच्चार्यमाणा संख्या न्यूना अथवा अधिका दातुं शक्यते।

वयं अस्मभ्यं सर्वेभ्यः एकाकी भवनम् इत्यपेक्षया सर्वैः सह निवासः रोचते । वयं सर्वे कस्मिंश्चित् समूहे जीवामः । चलत, पश्यामः एकं तादृशं समूहं - गुरलीनः नागराजनः तयोः पुत्री तान्या समरः च ।

एते अन्योऽन्येन कथं सम्बद्धाः सन्ति ?

यत् चित्रं त्वं दृष्टवान्, तस्मिन् चित्रे दर्शिताः जनाः एकस्य कुटुम्बस्य सन्ति । एतादृशानां कुटुम्बानां चित्रं वयं बहुवारं पश्यामः । कुत्र कुत्र पश्यामः एतादृशः कुटुम्बः ? किं सर्वे कुटुम्बाः एतादृशाः एव भवन्ति ? आगच्छ अधुना कस्मिँश्चित् कुटुम्बविषये पठामः ।

सीताम्मा

सीताम्मा एकस्मिन् लघुनगरे 'गुंटूरः' इति नामके 'पुश्तैनी' इति गृहे निवसति । गृहस्य अधः पितामहः पितामही, लघुपितृव्यः, तथा च पितृव्यपत्नी एते निवसन्ति । प्रथमतले सीताम्मा स्वस्य पित्रा, मात्रा एवञ्च लघुभगिन्या गीताम्मया सह निवसति । द्वितीयतले पितृव्यः तथा च तस्य त्रयः पुत्राः निवसन्ति । केभ्यश्चित् मासेभ्यः पूर्वं पितृव्यपत्नी दिवङ्गता आसीत् ।

बलकानां स्व–कुटुम्बानां विषये चतुर्थपाठस्य बुद्धौ स्थापनं लाभाय भवेत् । कक्ष्यायां विद्यमानानां कुटुम्बेषु विविधप्रकारेण पाठस्य आरम्भः भवितुम् अर्हति ।

तस्य ज्येष्ठ-पितृव्यः तथा च नूतना पितृव्यपत्नी पृथक् वृष्टिवारिण्याः एकस्मिन् प्रकोष्ठे निवसतः, तस्याः नवविवाहः अस्ति । रात्रेः भोजनात् पूर्वं सीताम्मायाः माता सर्वान् बालकान् पाठयति ।

सर्वेषां भोजनम् अधःस्तनायां पाकशालायां निर्माणं भवति । प्रयासः भवति यत् रात्रौ सर्वे मिलित्वा खादेम, अद्यत्वे रात्रौ पितृव्यपत्न्याः लघुपुत्री सीताम्मायाः मातुः पार्श्वे शयनं करोति । प्रातः सीताम्मा तां विद्यालयस्य कृते सज्जीकरोति ।

* सीताम्मायाः कुटुम्बे के के सन्ति ?
* एतेषां विविधजनानां परस्परं कीदृशः सम्बन्धः अस्ति ?
* अस्मिन् कुटुम्बे गतेभ्यः केभ्यश्चित् मासेभ्यः किं किं परिवर्तनम् आगतम् अस्ति ?

तारा

तारा स्वस्य मात्रा एवञ्च मातामहेन सह चैन्नयीनगरे निवसति । तस्याः माता मिनाक्षी विवाहं न कृतवती, तारां पुत्रीकृतवती च, मीनाक्षी प्रातः कार्यालयं गच्छति, तथा च सायं गृहम् आगच्छति । विद्यालयात् आगमनानन्तरं तारायाः अवधानं तस्याः मातामहः करोति । सः एव एतां भोजनं भोजयति । गृहकार्यस्य करणे साहाय्यं करोति । तस्याः साकं क्रीडति अपि । अवकाशस्य दिवसेषु त्रयः भ्रमितुं सुदूरं गच्छन्ति, बहु आनन्दिताः भवन्ति । कदाचित् तारायाः पितृव्यः

पितृव्यपत्नी

यदि केचन बालाः स्वस्य कुटुम्बसदस्यानां दुरभ्यासविषये यथा - मादकानाम् औषधानां दुरभ्यासविषये वक्तुम् इच्छन्ति तर्हि एतादृशेषु विषयेषु वार्तालापः अतीव संवेदनशीलतया करणीयः । तेभ्यः जायमानस्य हानिकारकस्य प्रभावस्य विषये कक्षायां चर्चा आवश्यकी अस्ति । भवन्तः एतेषु विषयेषु सेवाकालिकानां

प्रशिक्षणकार्यक्रमाणां विषये अपि अवश्यं चर्चां कुर्वन्तु।

तथा तेषां पुत्राः च अपि आगच्छन्ति । तदा ते सर्वे मिलित्वा बहुः क्रीडन्ति, वार्तालापम् अपि कुर्वन्ति।

* तारायाः अवधानं कः करोति ? कथम् ?
* कुटुम्बस्य जनाः मिलित्वा किं किं कुर्वन्ति ?



सारा हसीबः च

सारा हसीबः च एकस्मिन् नगरे निवसतः। उभौ अपि वृत्तिं कुरुतः। गोपालः एकस्मिन् कार्यालये अधिकारी अस्ति, तथा च सारा विद्यालये पाठयति । गोपालस्य पिता सेवानिवृत्तः जातः अस्ति । ताभ्यां सह निवसति । सायं त्रयः अपि युगपत् उपविश्य दूरदर्शनं पश्यन्ति । अथवा द्युतक्रीडां क्रीडन्ति । गोपालः सर्वैः सह उपविश्य दूरदर्शनं पश्यति । दूरदर्शनस्य सार्धमेव परस्परं वार्तालापाः अपि जायन्ते। अवकाशस्य दिवसेषु समीपस्थाः बालकाः तस्मिन् गृहे आगत्य बहु कोलाहलं कुर्वन्ति। कदाचित् क्रीडित्वा कदाचित् भ्रमित्वा, कदाचित् नाटकं दृष्ट्वा इति एवं सर्वे मिलित्वा आनन्दं कुर्वन्ति।

* अस्मिन् कुटुम्बे के के सन्ति ?

* सर्वैः सह दूरदर्शनं द्रष्टुं पितुः बहु-आनन्दः आगच्छति किमर्थम् ?
* कुटुम्बस्य जनाः कथम् आनन्दं कुर्वन्ति ?

तोतारामः

तोतारामः स्वस्य पिता, पितृव्यः, पितृव्यभ्राता एतैः सह मुम्बयी-नगर्यां निवसति। तोतारामः तथा च तस्य भ्राता मुम्बयी-नगरं पठितुम् आगतवन्तौ, तस्य पिता एवञ्च पितृव्यः अत्र सेवां कुरुतः।

कदाचित् केषाञ्चित् एतादृशानां कुटुम्बानां (मादक-औषधानां दुरभ्यासः) बालानाम् अपि एतादृशः दुरभ्यासः जायते। यदि तेषु बालेषु अथवा अन्येषु केषुचित् बालेषु एतादृशः व्यवहारः दृश्येत तर्हि

तैः सह विशेषेण चर्चा करणीया, येन उचितका

गृहस्य सर्वमपि कार्यं सर्वे मिलित्वा कुर्वन्ति । तोतारामस्य पितृव्येन पक्कं भोजनं सर्वेभ्यः रोचते। तस्य पिता क्रयण-विक्रयणसम्बद्धं सर्वमपि कार्यं करोति । सः यावद् धनम् अर्जयति, तस्मात् कञ्चित् अंशं ग्रामे तोतारामस्य पितामहाय प्रेषयति । तोतारामस्य माता, पितामहः, पितामही, पितृव्यपत्नी एवञ्च लघुभ्राता, भगिनी च ग्रामस्य गृहे निवसन्ति ।

सः स्वकीयं मातरं बहु-स्मरति । सः मात्रे बहु-सुदीर्घं पत्रं लिखति ।

* तोतारामस्य कुटुम्बस्य जनाः परस्परं कथं सम्पर्के भवन्ति ?
* तोतारामस्य कुटुम्बस्य के जनाः नगरे तिष्ठन्ति ? एवञ्च के ग्रामे तिष्ठन्ति ? किमर्थम् ?

कृष्णा एवञ्च कावेरी

कृष्णा एवञ्च कावेरी स्वस्य पितृभिः सह निवसतः । प्रातः सज्जीभूय त्रयः युगपत् गृहात् निर्गच्छन्ति । कृष्णा कावेरीं विद्यालयं त्यक्त्वा, महाविद्यालये गच्छति । पिता सम्पूर्णदिनस्य कृते आपणं गच्छति,

दिवसे कावेरी विद्यालयात् प्रत्यागत्य तालकम् उद्घाटयति, एवञ्च कृष्णायाः प्रतीक्षां करोति । महाविद्यालयात् आगत्य कृष्णा भोजनम् उष्णीकरोति । द्वौ मिलित्वा खादतः च ।

विद्यालयस्य कार्यं करणानन्तरं कावेरी बहिः क्रीडितुं गच्छति । प्रत्यागत्य भ्रात्रा सह कदाचित् पार्वती अपि क्रीडति । कदाचित् दूरदर्शनं पश्यति । पिता यदा आगच्छति, तदा त्रयः मिलित्वा भोजनं निर्मान्ति, खादन्ति च ।

अवकाशेषु स्वस्य मात्रा सह वसितुं गच्छति, किन्तु तस्याः स्वस्यैव गृहे उपवेष्टुं मनः भवति । तस्य पिता सम्पूर्णानि वस्तूनि च अत्रैव भवन्ति ।

* कृष्णा स्वस्य भगिन्याः अवधानं कथं करोति ?
* कुटुम्बेषु कानि कानि कार्याणि युगपत् क्रियन्ते ?

त्वया बहूनां कुटुम्बानां विषये पठितम् । केषुचित् प्रश्नेषु अपि चर्चा विहिता । कुटुम्बः कथम् अस्ति । कुटुम्बाः कीदृशाः भवन्ति ? अस्मिन् विषये त्वया किमपि चिन्तितम् एव स्यात् ।

कुटुम्बेषु किं किं भवति ?

प्रदत्तेषु वाक्येषु यः कुटुम्बे भवति तत्र (✓) इत्यस्य चिन्हं योजयत ।

* एकस्य कुटुम्बस्य जनाः प्रायः अन्यान्यवत् दृश्यन्ते । ☐
* कुटुम्बस्य जनानाम् परस्परं बहुः स्नेहः भवति । ☐
* एकस्मिन् कुटुम्बे जन्मना विवाहेन च वयं तस्य कुटुम्बस्य अंशाः भवामः । ☐
* कुटुम्बस्य जनाः प्रायः एकस्मिन् गृहे सहैव तिष्ठन्ति । ☐
* कुटुम्बस्य ज्येष्ठजनाः स्वस्य कुटुम्बस्य कृते धनम् अर्जयन्ति । ☐

पाठे केषाञ्चित् कुटुम्बानां विषये उक्तं वर्तते । एतद् अतिरिच्य अन्यानि अपि विविधानि कुटुम्बानि

भवन्ति। एतां विविधतां ज्ञातुं बालकैः सह तेषां कुटुम्बस्य विषये चर्चा कर्तुं शक्यते।

* कुटुम्ब-जनानां परस्परं युद्धं स्याद् चेत् अपि सर्वे सहैव तिष्ठन्ति। ☐
* कुटुम्बेषु बालकानां वृद्धानां च अवधानं भवति। ☐

स्वस्य कुटुम्बविषये काश्चन अन्याः वार्ताः चिन्तयत अपि च रिक्तस्थानं पूरयत।

_____

_____

सीताम्मायाः कुटुम्बः

किं त्वं कुटुम्बस्य कल्पना केनचित् वृक्षाकाररूपेण कर्तुं शक्नोषि ? अत्र सीताम्मायाः कुटुम्बः चित्रद्वारा दर्शितः अस्ति।



चल, अधुना त्वम् अपि स्वस्य कुटुम्बस्य एतादृशम् एव चित्रं स्वस्य उत्तरपुस्तिकायां निर्मापय। एतस्य कृते कस्यचित् ज्येष्ठजनस्य साहाय्यं स्वीकुरु। साहाय्यार्थं सीताम्मायाः कुटुम्बस्य चित्रं पश्य।

एकविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
दादा	-	पितामहः
दादी	-	पितामही
चाचा	-	पितृव्यः
नाना	-	मातामहः

दक्षिणः वामः

अधः एकं हस्तस्य चित्रं निर्मितम् अस्ति। तस्योपरि स्वस्य हस्तं स्थापयतु, अङ्गुष्ठस्योपरि अङ्गुष्ठः।



त्वया यः हस्तः चित्रे स्थापितः अस्ति । सः भवतः दक्षिणः हस्तः वर्तते । अधुना स्वस्य वामः हस्तः उत्तरपुस्तिकायाः पृष्ठेषु स्थापय । एवञ्च दक्षिणहस्तेन तस्य परिधौ अङ्कनीं चालयित्वा चित्राणि निर्मापय ।

अस्मिन् पर्याये यस्य हस्तस्य चित्रं निर्मितम् अस्ति । सः तव वामः हस्तः वर्तते ।

कुरु दक्षिणं हस्तम् अग्रे, कुरु वामहस्तं पृष्ठे,
कुरु एतद् उपरि अधः कुरु च किञ्चित् स्मयनम्
आगच्छति ---पुनर् आनन्दः

कुरु वामहस्तम् अग्रे, कुरु दक्षिणहस्तं पृष्ठे
कुरु एतद् उपरि अधः कुरु च किञ्चित् स्मयनम् ।
आगच्छति ---पुनर् आनन्दः

एवमेव अधुना दक्षिणपादस्य एवञ्च वामपादस्य कृतेऽपि गानं कुरु ।

अधुना दृष्ट्वा वद कक्ष्यायाम्

- तव वामभागे किम् अस्ति ?
- तव पृष्ठे किं किम् अस्ति ?
- त्वं कस्य वामभागे उपविष्टः अस्ति ?
- तव दक्षिणे किम् अस्ति ?
- तव दक्षिणभागे कः उपविष्टवान् अस्ति ?
- तव अग्रे किम् अस्ति ?
- त्वं कस्य दक्षिणभागे उपविष्टवान् असि ?

सङ्केतेन गीत-गायने बालकाः आनन्दम् अनुभविष्यन्ति । दक्षिणः, वामः, उपरि, अधः, अग्रे, पृष्ठे इति स्वयं स्वस्य अनुभवेन शिक्षयिष्यन्ति ।

* एतत् एकं चित्रम् अस्ति, यस्मिन् रुचिरा मध्ये अस्ति। अधुना त्वम् अस्मिन्नेव कोष्ठके चित्रं निर्मापय।

- रुचिरायाः पृष्ठे पुस्तकस्य ।
- रुचिरायाः अग्रे वृक्षस्य
- रुचिरायाः दक्षिणभागे कस्यचित् जन्तोः चित्रम्।
- रुचिरायाः वामभागे आसन्दस्य।

© NCERT not to be republished

रुचिरां गृहात् विद्यालयं प्रापय ।

चित्रे विद्यालयं पश्य। गृहात् विद्यालयपर्यन्तं मार्गम् अन्विष्य। अधुना रुचिरायाः गृहात् विद्यालयपर्यन्तं मार्गम् अङ्कन्या दर्शय ।



* रुचिरायाः गृहात् विद्यालयपर्यन्तं मार्गे कानि कानि स्थानानि वस्तूनि च आगच्छन्ति ? तेषां नामानि लिख।

_____ _____ _____ _____

_____ _____ _____ _____

_____ _____ _____ _____

* एतेषु कानि वस्तूनि दक्षिणदिशं मिलन्ति एवञ्च कानि वस्तूनि वामभागे मिलन्ति ?

दक्षिणभागम्	वामभागम्
_____	_____
_____	_____
_____	_____
_____	_____
_____	_____
_____	_____

* गृहात् विद्यालय-गमनसमये कतिवारं रुचिरा वक्रीभवति ?

_____

अग्रिमे पृष्ठे एकं चित्रं निर्मितम् अस्ति । एतत् चित्रं पूर्वं प्रदत्तस्य चित्रस्य लघुरूपम् अस्ति। अस्मिन् स्थानस्य चित्राणां स्थाने चिह्नानि निर्मितानि सन्ति। एतादृशानि चित्राणि मान-प्रदेशम् इति उच्यन्ते। चिह्नान् परिचिनोतु लिखतु च।



किं त्वं वक्तुं शक्नोषि यत् एतानि चिह्नानि किमर्थं निर्मितानि भवन्ति ?

© NCERT not to be republished

अधः चित्रस्य समक्षम् एका सूचिः निर्मिता अस्ति । अस्मिन् त्वं स्वस्य इच्छया काँश्चन सङ्केतान् निर्मापय । एतद् चिह्नं पूर्व-चिह्नस्य अपेक्षया पृथक् निर्मापय । अधुना भवतः निर्मितं चित्रं मानचित्रेषु अपि निर्मापय ।



रुचिरायाः गृहम्

विद्यालयः

पत्रालयः

वृक्षः

चिकित्सालयः

बसस्थानकम्

कूपः

आपणः

द्वारम्

गृहम्

मान-चित्रे चिह्न-निर्माणस्य आवश्यकतायाः स्पष्टीकरणं बालकैः निर्मितेषु चित्रेषु चर्चाकरणं च रुचिकरं सार्थकम् उपयोगी च भवेत् ।

© NCERT not to be republished

पृष्ठसंख्या 149 इत्यत्र त्वया चिकित्सालये '+' इति चिह्नं दृष्टं स्यात्। एतस्य चिह्नस्य साहाय्येन पठनं विना एव चिकित्सालयः ज्ञातुं शक्यते।

एतादृशानि अन्यानि कानि कानि चिह्नानि तव समीपे दृश्यन्ते। एतद् अपि लिख।

चिह्नम्	किं दर्शयति

* मान-चित्रे दर्शितानां चिह्नानां सूची निर्मिता अस्ति। अवधानेन पश्यतु लिखतु च।



- मान-चित्रे कति गृहाणि सन्ति ? _____
- मान-चित्रे कति आपणानि सन्ति ? _____
- मान-चित्रे कति वृक्षाः सन्ति ? _____

© NCERT not to be republished

- मान-चित्रे कति हस्तनलिकाः सन्ति ? _____
- विद्यालयः पत्रालयस्य समीपम् अस्ति अथवा चिकित्सालयस्य समीपम् ? - _____
- बसस्थानकस्य समीपं किम् अस्ति ? _____
- यदि मान-चित्रेण सह सूचिका न स्यात् तर्हि त्वं मान-चित्रं पठितुं शक्नुयात् ?

_____

* गणिते यत् चिह्नं त्वया शिक्षितम् अस्ति तद् लिख ।

_____ _____ _____

_____ _____ _____

भवतां गृहात् विद्यालयं यावत् यः मार्गः अस्ति, तस्मिन् मार्गे आगतानि स्थानानि चिह्नेन दर्शयन्तु । भवन्तः स्वरुचेः अनुगुणं चिह्नानां प्रयोगं कर्तुं शक्नुवन्ति ।

द्वाविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
नक्शा	-	मानचित्रम्
हैंडपंप	-	हस्तनलिका
कुआँ	-	कूपः
डाकघर	-	पत्रगृहम्

23 वस्त्रं सज्जितं कथम्

माता साजिदायै एकं सुन्दरं द्विपट्टं दत्तवती। द्विपट्टस्य उपरि सुन्दरं वस्त्रचित्राणि एवञ्च लघुदर्पणानि अपि आसन्। रात्रौ भोजनानन्तरं साजिदा द्विपट्टं विविध-प्रकारेण आच्छाद्य क्रीडितुं प्रारब्धवती। क्रीडित्वा क्रीडित्वा श्रान्ता जाता। अतः द्विपट्टस्य आच्छादनसमनन्तरम् एव सा सुप्तवती। स्वप्ने सा चिन्तितवती – एतावान् सुन्दरः द्विपट्टः कथं निर्मितः स्यात् ?



साजिदायाः द्विपट्टः कथं निर्मितः स्यात् ?

* त्वम् अपि एकं द्विपट्टं लम्बायमानम् एकम् असीवितं वस्त्रं वा स्वीकरोतु। तत् विविध-प्रकारेण धृत्वा पश्य। कतिभिः प्रकारैः धर्तुं शक्तवान् ?
* किं कश्चित् तत् चित्रवेष्टिं शिरवस्त्रं वा निर्माय धृतवान् ? द्विपट्टः अन्येन केन केन विधिना धृतः।
* स्वस्य गृहे कानिचन षड् वस्त्राणि पश्य। त्वया वस्त्रेषु कः कः भेदः दृष्टः– यथा – स्पर्शने, वर्णे, अभिरूपे च ?

* कमपि स्थूलवस्त्रम् अथवा गोणीं अवधानेन पश्य। किं त्वं स्थिरान् तिरश्चः च तन्तून् द्रष्टुं शक्तवान् ? किमपि वस्त्रं समीपात् द्रक्ष्यति चेत् त्वम् एतादृशम् एव अभिरूपं द्रक्ष्यति।

त्वम् अपि एतादृशम् एव कागदस्य पत्राणि सीवनं कृत्वा पश्य।



* कागदेन सीवनम्

1. पृथक्-पृथक् वर्णानां कागदद्वयं स्वीकुरु।
2. एकस्मिन् कागदे स्थिरां रेखां कर्षय तथा च अपरस्मिन् तिर्यक् रेखाम्।
3. उभयोः कागदयोः कर्षितां रेखां कर्तय। अवधेयः पट्टःपृथक् न भवेत्।
4. उभयं कर्गदम् अन्यस्य उपरि अन्यं संस्थाप्य तयोः (यानि चित्रेषु वर्णैः दर्शितानि सन्ति) उभौ कोणौ परस्परं योजय।
5. अधुना कर्तितानि पत्राणि परस्परं सीवित्वा कटं निर्मापय।
6. एतस्य उपान्ते एकस्य कागदस्य पत्रं श्लेषपट्टिकया संश्लेषय। येन तद् नोद्धटेत्।

* वस्त्रेषु अङ्कनम्

त्वं पादपानाम् अप्सराः इत्यस्मिन् पाठे वस्त्रेषु निर्मितानि पुष्पाणाम् अभिरूपाणि दृष्टवान्। कर्तितानां शाकानां साहाय्येन त्वम् अपि कानिचन अभिरूपाणि निर्मापय। पुष्पशाकम् अथवा भिण्डिं मध्यभागात् कर्तय । तेषु आद्रीवर्णं संस्थाप्य कागदे अथवा वस्त्रेषु चिह्नं कृत्वा स्वस्य अभिरुच्यनुगुणम् अभिरूपं निर्मापय।

कागदानां सीवनम्, वस्त्रेषु चिह्न-करणं च, अस्माकं पारम्परिक-कलां संवर्धयति। एतेन बालकाः प्रतिभा-प्रदर्शनस्य अवसरम् अपि प्राप्स्यन्ति।

त्रयोविंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
दुपट्टा	-	द्विपट्टः
बोरी	-	गोणीः
कागज	-	कागदः
डिजाइन	-	अभिरूपम्

24 जीवनस्य जालम्

सर्पः

पादपाः

वृक्षशायिका

जलम्

सूर्यः

घासः

अधुना पर्यन्तं प्रायः त्वया एतद् पुस्तकं सर्वं पठितं स्यात्। त्वया पादपानां वृक्षाणां, जन्तूनां, जलस्य, गृहस्य, वाहनानाम् अन्येषां च बहूनां विषये पठितं चिन्तितं च ? किं

पक्षी

चन्द्रमा

गौः

मूषकः

वायुः

गृहम्

मृत्तिका

त्वं वक्तुं शक्नोषि यत् अस्माभिः एतेषां विषये ज्ञातुं चिन्तयितुं च प्रयत्नः किमर्थं कृतः ?

* चित्रेषु दर्शितैः वस्तूभिः सह अस्माकं कः सम्बन्धः अस्ति ? चलत अवगच्छामः-
* प्रप्रथमं रिक्तस्थाने चित्रं निर्मापयत।
* अधुना स्वस्य चित्रात् एकां रेखां कर्षयित्वा तैः वस्तूभिः सह योजयत। यत् तुभ्यं जीवनाय अत्यावश्यकं प्रतीयते ।
* किं भवान् आत्मानं गृहेण सह सम्बद्धवान् ?
* पश्येत, गृहं कैः कैः वस्तूभिः योजितम् अस्ति। प्रथमं चिन्तयत, - गृहं कैः वस्तुभिः निर्मीयते।
  - काष्ठम् – यच्च वृक्षात् लभ्यते।
  - इष्टिका – या जलेन मृत्तिकया च निर्मिता अस्ति।
  - मृत्तिका – अस्माभिः भूमेः प्राप्यते।
  - जलम् - नदीतः, सरोवरात्, कूपात्, वृष्टितः वा अस्माभिः प्राप्यते।

त्वया अवगतं खलु, गृहं कीदृशैः चित्रैः एवञ्च शब्दैः सह योजनीयम् ?

अधुना एकैकं कृत्वा सर्वाणि वस्तूनि अपरैः वस्तूभिः सह योजय। एतद् सर्वं यदा त्वं करोषि, तदा भवितुं शक्नोति यत् अन्येषां वस्तूनाम् अपि नामानि लेखितव्यानि।

एतद् सर्वं करणानन्तरं किं निर्मितम्, एकं वृहत् जालं निर्मितं स्यात्।

एतद् जालं दृष्ट्वा त्वं किं ज्ञातवान् ?

त्वं यत् जालं निर्मितवान् तद् स्वस्य मित्राणि दर्शय। एवञ्च तैः निर्मितं जालम् अपि पश्य। किं सर्वाणि अपि समानानि सन्ति ? मित्रैः सह एतद् विषये चर्चाम् अपि कुरु।

बालकैः निर्मितं जालं तेषां परिसरे प्राप्यमाणानां वस्तूनां परस्परं निर्भरतायाः अवबोधं दर्शयति। कक्ष्यायाम् अस्मिन् विषये चर्चाकरणेन तेषां जालनिर्माणे साहाय्यं भविष्यति।

चतुर्विंशपाठे प्रयुक्ताः विशिष्टाः शब्दाः

हिन्दीशब्दाः		संस्कृतशब्दाः
वर्षा	-	वृष्टिः
तालाब	-	सरोवरः
समझ	-	अवबोधः



लघुः राजकुमारः

(द लिटिल प्रिंस)

एन्टोनी द सेंट एक्सूपेरी

अनुवादकर्ता देवीप्रसादः

Rs 65.00 / pp80 / 2007

अधिकज्ञानार्थं कृपया www.ncert.nic.in इत्यत्र पश्यन्तु, अथवा कॉपीराइटपृष्ठे प्रदत्ते सङ्केते व्यापारप्रबन्धकेन सह सम्पर्कं कुर्वन्तु।

0328

राष्ट्रियशैक्षिक-अनुसन्धानम् एवं च प्रशिक्षणपरिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

ISBN 81-7450-473-7